ĀKHYĀTAVĀDA

OF

RAGHUNĀTHA SIROMAṆI

WITH

ĀKHYĀTAVĀDAVYĀKHYĀ

OF

RĀMABHADRA SĀRVABHAUMA

Critically edited

by

PRABAL KUMAR SEN

Sanskrit Pustak Bhandar

38, BIDHAN SARANI, CALCUTTA-700006

ĀKHYĀTAVĀDA

OF

RAGHUNĀTHA ŚIROMAṆI

WITH

ĀKHYĀTAVĀDAVYĀKHYĀ

OF

RĀMABHADRA SĀRVABHAUMA

Critically edited

by

PRABAL KUMAR SEN

Lecturer in Philosophy
University of Calcutta.

SANSKRIT PUSTAK BHANDAR

38, BIDHAN SARANI, CALCUTTA-700006.

Ākhyātavāda of Raghunātha Śiromaṇi
with
Ākhyātavādavyakhyā of Rāmabhadra Sārvabbhauma

First Published November, 1979

Price : Rs. ~~12·00~~
22/–

Published by Sri Shyamapada Bhattacharya, Sanskrit Pustak Bhandar, 38, Bidhan Sarani, Calcutta-700006. Printed in India by Sri Suresh Dutta at Modern Printers, 12, Ultadanga Main Road, Calcutta-700067.

येषां कृपाकणस्पर्शान्मतिमान्द्यं विलीयते ।
वैदुष्यमतुलं येषामज्ञानध्वान्तभञ्जनम् ।।
दुर्गमे न्यायकान्तारे मार्गः यैस्तु प्रदर्शितः ।
अर्प्यते तेभ्य एवेदं शिष्येण नतशिरसा ।।

प्राक्कथनम्

॥ नमो दुर्गायै ॥

सुविदितमेतद्विपश्चितां यच्छब्दप्रमाणे वादिनो बहुधा विप्रतिपत्तिर्दृश्यते। वैयाकरणैर्मीमांसकैस्तथा नैयायिकैः स्वकं स्वकं सिद्धान्तमाश्रित्य शब्दार्थस्वरूपमुपपादितम्। खण्डनमण्डनचातुर्यञ्च तेषामुपलभ्यते तत्तत्साम्प्रदायिकग्रन्थेषु। एषु खलु श्रीरघुनाथशिरोमणिकृताख्यातवादः लब्धप्रतिष्ठो विराजते। अत्र मतान्तरान्निरस्याख्यातस्य यत्नवाचकत्वम्, स्थलविशेषेऽनुकूलव्यापारलक्षकत्वम्, कुत्रचिद्वाऽश्रयत्वप्रतियोगित्वादिलक्षकत्वं युक्त्या प्रतिपादितम्।

श्रीमथुरानाथतर्कवागीशकृतविवृत्या श्रीरामचन्द्रन्यायवागीशकृतटीकया च साकमाख्यातवादस्य मुद्रणं सटीकतत्त्वचिन्तामणिसम्पादनावसरे स्वर्गीयैः म०म० कामाख्यानाथतर्कवागीशमहोदयैर्विहितम्। ग्रन्थोऽयमधुना दुर्लभः।

श्रीरामभद्रसार्वभौमकृताख्यातवादव्याख्यायाः जीर्णैका मातृका मम मातुलालये सौभाग्यवशात् समुपलब्धा। व्याख्यायाः दुर्लभत्वमुपादेयत्वञ्च विभाव्य मदीयाध्यापकप्रवराः श्रीगोपीनाथभट्टाचार्यास्तथा श्रीपञ्चाननतर्कसांख्यवेदान्ततीर्थाः व्याख्येयं मुद्रणीयेति मामादिशन्ति स्म। समाप्तेऽस्मिन् कर्मणि ते हृष्टाः स्युरिति विश्वसिमि।

अस्मिन्नवसरे मम न्यायगुरुभ्यः श्रीमधुसूदनन्यायाचार्येभ्यः, श्रीविश्वबन्धुन्यायाचार्येभ्यः, श्रीनारायणचन्द्रन्यायाचार्येभ्यस्तथा श्रीश्यामापदन्यायतर्कतीर्थेभ्यो भक्तिभूयिष्ठं प्रणामं निवेदयामि। न्यायशास्त्रे मम प्रवृत्तौ तेषां कृपैव निदानम्, मन्येऽकिञ्चित्करमपीदं संस्करणं ते गुरुदक्षिणात्वेन स्वीकरिष्यन्ति। मदीयशुभचिन्तकाः मैथिलनैयायिकप्रवराः श्रीकुलानन्दमिश्रवर्याः स्वीयामसुस्थतामविगणय्यापि पाठयोजनादिषु महत् साहाय्यं दत्तवन्तः, एभ्य उदारचरितेभ्यो मम कृतज्ञता कथं ज्ञापनीयेति न सम्यग् जाने। अकिञ्चनेन मया मिश्रमहोदयेभ्यः प्रणतिमन्तरा किं वा दीयते। अधमर्णीकृतश्चाहं दुर्लभग्रन्थप्रदानेन श्रीअरुणकुमार मुखोपाध्यायैः। प्रकाशितोऽयं ग्रन्थः श्रीश्यामापद भट्टाचार्यैः, मुद्रितश्च द्रागेव श्रीसुरेश दत्तमहोदयैरतस्तेभ्योऽपि साधुवादं प्रयच्छामि।

प्रास्ताविकमन्यत् सर्वमाङ्गलभाषाभुमिकायां निवेदितम्, ग्रन्थभूयस्त्व-भयान्नेह पुनरुच्यते ।

एकामेव मातृकामाश्रित्य संस्करणमिदं प्रस्तुतम्, ममापि ग्रन्थशोधने प्रथमोऽयं प्रयासः, न वाऽहं मुद्रणाशुद्धिशोधनपटुरतोऽत्र प्रमादबाहुल्यं सम्भाव्यत एव। मातृकान्तरञ्चेत् प्राप्स्यते, शोभनतरं किमपि संस्करण-मभियुक्ततरैः कर्तव्यमिति प्रार्थयते—

१६०० शकाब्दे
दीपावल्याम्

सुधीजनविधेयः
श्रीप्रवाल कुमार सेनः
कलिकाता विश्वविद्यालयस्थः

PREFACE

In 1975, I chanced upon a manuscript of *Ākhyātavādāvyākhyā* of Rāmabhadra Sārvabhauma in the personal collection left behind by my maternal uncle, Late Debiprasad Gupta who died young while still a student of the M.A. class of the Calcutta University. I showed the manuscript to my teachers, Prof. Gopinath Bhattacharya and Pandit Panchanan Shastri, who advised me to edit this extremely rare work. Hence this edition. My gratitude is due to them for their kind advice and encouragement.

I also take this opportunity of expressing my gratitude to all my teachers of Nyāya, viz. Pandit Madhusudan Nyayacharya, Pandit Visvabandhu Nyayacharya, Pandit Narayan Chandra Nyayacharya and Pandit Shyamapada Nyaya-Tarkatirtha for the interest they took in my work and the encouragement that I received from them.

I humbly dedicate this edition to all my teachers as a mark of respect for and token of gratitude to them.

Pandit Kulananda Mishra of K. S. Sanskrit University, Darbhanga, helped me solve a number of knotty textual problems. Shri Arun Kumar Mukhopadhyaya helped me by lending some rare books. Shri Shyamapada Bhattacharya, Proprietor of Sanskrit Pustak Bhandar, published this book in these difficult times, and Shri Suresh Dutta, Proprietor of Modern Printers, agreed to print it on a priority basis in spite of heavy schedules. My thanks and gratitude are due to all these kind souls.

The present edition is based on a single manuscript, and is in fact my first attempt at bringing out a publication of this kind. In spite of the efforts of all of us, some minor printing

mistakes have crept in. The rising cost of paper and printing compelled me to cut down the introduction to the minimum. I hope scholars will treat these and other lapses, if any, with indulgence, and send me suggestions for improvement of the text.

Department of Philosophy
Calcutta University
20-10-1979

PRABAL KUMAR SEN

INTRODUCTION

I

RAGHUNĀTHA ŚIROMAṆI AND HIS WORKS

Raghunātha Śiromaṇi, a disciple of Vāsudeva Sārvabhauma, and by far the most outstanding figure of the Bengal school of Navya-Nyāya, belonged to the second half of the fifteenth century A.D.[1] He attained great prominence as a commentator of *Tattvacintāmaṇī*, an epoch-making work of Gaṇgeśa Upādhyāya. With the sole exception of *Tattvacintāmaṇyāloka* of Jayadeva Miśra, the earlier commentaries on *Tattvacintāmaṇī* were cast into oblivion by *Tattvacintāmanidīdhiti of* Raghunātha. It is really unfortunate that this work is not available in its entirety.[2] Raghunātha also commented on *Ātmatattvaviveka* of Udayana and *Dravyakiraṇāvalīprakāśa*, *Guṇakiraṇāvalīprakāśa* and *Nyāyalīlavatīprakāśa* of Vardhamāna Upādhyāya. *Guṇakiraṇāvalīprakāśadīdhiti*[3] and *Ātmatattvavivekadīdhiti*[4] are are now available in print.

Raghunātha was not only a successful commentator – he was an eminent philosopher in his own right. While commenting on Gaṅgeśa, Raghunātha has criticised him on a number of occasions, and the alternative theories suggested by him won universal acceptance in course of time. The later Naiyāyikas of Bengal made the *Anumānadīdhiti* the main centre of their attention, and no less than fifty-two subcommentaries were written on it.[5] Even Gokulanātha Upādhyāya and Vaṁśadhara Upādhyāya of the Mithilā school, the traditional rival of the Bengal school, showed due respect to Raghunātha by commenting on *Anumānadīdhiti.*[6] But the original thinking of Raghunātha reaches its highest level in three independent works : *Padārthatattvanirūpaṇa*, *Nañvāda* and *Ākhyātavāda*. Raghunātha also wrote a work relating to Dharmaśāstra, and it was called *Malimlucaviveka*. This shows that his interests were not confined to Navya-Nyāya alone.

In *Padārthatattvanirūpaṇa* Raghunātha has subjected the traditional Nyāya-Vaiśeṣika metaphysics to a through examination. He has rejected a number of time-honoured doctrines, while he has been bold enough to admit some doctrines opposed by the Nyāya-Vaiśeṣika school. This seems to be his best work. *Nañvāda* deals with the meaning of the negative particles, and thus fills up a gap in the *Śabdakhaṇḍa* of *Tattvacintāmaṇi*. Annotated translations of *Padārthatattvanirūpaṇa* and *Nañvāda* have been published in the Harvard Oriental Series, and the reader is referred to these translations for more information about these texts. The contents of *Ākhyātavāda*, which deals with the meaning the verbal ending (*ākhyāta*), will be given in a later part of the introduction.

It may be noted here that these independent works of Raghunātha were commented on by a number of Naiyāyikas, and some of them have also appeared in print. The reader is referred to *Vaṅge Navya-Nyāya Carcā* by D. C. Bhattacharya for more information about the commentaries on *Padārthatattvanirūpaṇa* and *Nañvāda*.

II

RĀMABHADRA SĀRVABHAUMA AND HIS WORKS

Rāmabhadra Sārvabhauma, the son of Jānakīnātha Cūḍāmaṇi, belonged in all probability to the first half of the sixteenth Century A. D.[7] He was a prolific writer and a great teacher. D. C. Bhattacharya has given a list of his works, which is as follows :

(1) *Nyāyarahasya*, (2) *Kusumāñjalikārikāvyākhyā*, (3) *Padārthatattvanirūpaṇaprakāśā*, (4) *Nañvādavyākhyā*, (5) *Samāsavāda*, (6) *Śabdānityatvavāda*, (7) *Suvarṇataijasatvavāda*, (8) *Guṇarahasya*, (9) *Siddhāntarahasya*, (10) *Siddhāntasara* and (11) *Samayarahasya*.[8]

Of these, (1) is a commentary on the first four chapters of the *Nyāya-Sūtras*, (2) is a commentary on the verses in

Nyāyakusumāñjali of Udayana, (3) and (4) are commentaries on two tracts of Raghunātha. (5)—(8) are independent works, (9) and (10) are in all probability collections of small tracts, and (11) relates to Dharmaśāstra. (2) and (3) have appeared in print, and we are happy to add to this list one more work of Rāmabhadra, *viz.* his *Ākhyātavādavyākhyā*, which is a commentary on Raghunātha's *Ākhyātavādā.* It seems that Bhattacharya did not come across any copy of this commentary.

Rāmabhadra was the teacher of Mathurānātha Tarkavāgīśā, Jagadīśa Tarkālaṅkāra, Gaurīkānta Sārvabhauma and Jayarāma Nyāyapañcānana. It seems that he was also the teacher of Śrīrāma Tarkālaṅkāra, the father of Mathurānātha, and Harirāma Tarkavāgīśa, the teacher of Gadādhara Bhattācārya Cakravartī and Raghudeva Nyāyālaṅkāra.[9] It is a measure of success of Rāmabhadra as a teacher that many among his illustrious students attained the rare academic stature of *Jagadguru.*

We cannot undertake in the short compass of this introduction a detailed discussion of Rāmabhadra's attainments as a commentator and philosopher. We reserve this task for the introduction to a critical edition of Rāmabhadra's *Nyāyarahasya,* which is in press.

III

ĀKHYĀTAVĀDA

The problem discussed in *Ākhyātavāda* is on the borderline of linguistics and semantics, and the arguments presented in it are sometimes dependent on the peculiarities of the Sanskrit language. In Indian semantics, we come across many generalized theories about the meaning and syntactic structure of sentences, and the analysis of a sentence depends on the theory one chooses to adopt. For example, the Naiyāyikas are in favour of *kaṛtṛmukhyakaśābdabodha* ; i.e. they stipulate that

in the verbal cognition generated by a sentence, what the word with nominative case ending means figures as the principal element. On the other hand, the Grammarians opt for *vyāpāramukhyakaśābdabodha* ; i.e. according to them, the verbal element in the sentence stands for the chief qualificand featuring in the cognition generated by a sentence. The Bhāṭṭa and Prābhākara Mīmāṃsakas also took part in this controversey, and played a significant role in it.

As expected, the philosophers belonging to these rival schools could never agree on the meaning of verb, verbal ending and verbal suffix. But they observed some common rules, and this saved the dispute from degenerating into a series of monologues. Among these rules, we may mention the preference for parsimony (*lāghava*) and the dictum that a word means a certain thing only if the latter cannot be meant by anything else (*ananyalabhyaḥ sabdārthaḥ*).

It may be noted here that verbs may be used in active voice (*kartṛvācya*) as well as passive voice (*karmavācya*) to describe the same situation. We may use either 'Devadattaḥ grāmaṃ gacchati' or 'Devadattena grāmo gamyate' when we want to say that Devadatta is going to a village. In the Sanskrit language, the verbal endings (*ākhyāta*) employed in *kartṛvacya* and *karmavācya* are known as *kartrākhyāta* and *karmākhyāta*. A proper theory about the meaning of *ākhyāta* must do full justice to both *kartrākhyāta* and *karmākhyāta*. Moreover, a theory of *ākhyāta* must be accompanied by a suitable doctrine about the meaning of verb (*dhātu*), which, in its turn, must hold good for both transitive (*sakarmaka*) and intransitive (*akarmaka*) verbs.

The problem about the meaning of *ākhyāta* thus becomes a many-faced one, and several solutions to it have been suggested. The traditional view of the Nyāya school is that *ākhyāta* primarily means conscious effort (*ākhyātasya yatno vācyaḥ*), and that the paradigmatic use of *ākhyāta* occurs in sentences where the word with nominative case ending denotes some conscious agent. The secondary meaning (*lakṣyārtha*) of

ākhyāta is operation conducive to a particular result (*anukūla-vyāpāra*), which figures in sentences like 'Ratho gacchati' (The chariot moves). In such cases, the nominative is something unconscious, and so, the question of conscious effort does not arise. The Bhāṭṭa Mīmāṃsakas accuse the Naiyāyikas of prolixity (*kalpanāgaurava*), and maintain instead that the primary meaning of *ākhyāta* is operation conducive to a particular result, since this holds good of all agents—conscious or otherwise. Maṇḍana Miśra, a noted Bhāṭṭa Mīmāṃsaka, admits that in some cases the *ākhyāta* may mean operation *simpliciter* *anukūlavyāpāro vyāpāramātraṃ vā'khyātārthaḥ*). For the Vaiyākaraṇas, *kartrākhyāta* and *karmākhyāta* stand respectively for the nominative and accusative of the verb with which they are associated (*kartṛkarmaṇi lakāravācye*). According to Taraṇi Miśra, the author of *Ratnakoṣa*, the meaning of *ākhyāta* is the act of producing (*bhāvanā*). Finally, the Prābhākara Mīmāṃsakas stress the fact that in the Sanskrit language employment of *ākhyāta* is strictly governed by person, number and tense. That is why we can guess the person, number and tense associated with a conjugated verb, even when we are provided with only the latter. According to the Prābhākaras, a verbal stem means a particular operation conducive to a particular result, and hence, it cannot give us any idea of number, person and tense ; and as such, the latter should constitute the meaning of *ākhyāta*. They also admit that in some cases (e.g. *karmākhyāta*), the *ākhyāta* may also mean locushood (*tatra tatra tattatphalānukūlatattadvyāpāraviśeṣa eva dhātvarthaḥ, saṁkhyāvartamānatvādikaṃ kvacidāśrayatvādikamapi vā'khyātārthaḥ*).

Gaṅgeśa has discussed these views in *Ākhyātavāda* and *Dhātuvāda* (two chapters of *Tattvacintāmaṇi*)[9]. Throughout the discussion he reiterates the Nyāya view that sentences like 'Devadattaḥ pacati' (Devadatta is cooking) generates a verbal cognition of the form 'Pākānukūlakṛtimān Devadattaḥ' (Devadatta possessing an effort conducive to the cookIng [of food]). This claim is fortified by the interchangeability of

the expressions 'Devadattaḥ pacati' and 'Devadattaḥ pākaṃ koroti'—the latter expression being a paraphrase (*vivaraṇa*) of the former. According to the Naiyāyikas, a verbal stem means a certain result or operation (*phalavyāparau dhātvarthau*), and as such, the verbal stem *pac* and the noun *pāka* should mean the same thing. By the method of residue, the verbal ending *-ti* should means the same as the verb *karoti.* The verbal root *kṛ*, when conjugated, yields the form *karoti*, and *kṛ* stands for effort (*kṛñaśca yatnavācakatvam*). It thus follows that the verbal ending primarily means effort. He also lays much stress on the principle of parsimony. The rival views are rejected as they fail to do justice to the verdict of experience, or else, indulge in theoretical prolixity.

In his *Ākhyātavāda*, Raghunātha has covered almost the same ground as Gaṅgeśa, but his style is remarkably concise, and in some respects, his treatment of the problem is superior to that of Gaṅgeśa. This may explain the fact that Raghunātha's *Akhyātavāda* superseded the *Ākhyātavāda* of Gaṅgeśa.[10]

According to Raghunātha, the traditional Nyāya doctrine about the meaning of *ākhyāta* is not adequate. It is true that experience and reasoning support the view that *ākhyāta* primarily means effort. But the range of its secondary meaning is not exhausted by operation conducive to some result. There are a number of cases where the *ākhyāta* can never mean conscious effort or operation conducive to some result. For example, in the sentence 'Devadatto-jānāti' (Devadatta knows), no conscious effort is indicated ; nor is indicated on operation conducive to some result, for the act of knowing does not produce any tangible result in its object. The same holds good of cases like 'Devadattaḥ icchati' (Devadatta desires), 'Devadattaḥ svapiti' (Devadatta sleeps), 'Devadatto vidyate' (Devadatta exists) etc. In these cases, the scope of the secondary meaning should be extended to locushood (*āsrayatva*), i.e. the *ākhyāta* merely indicates that Devadatta is the locus of the act denoted by the verb. Again, in cases like 'Ghaṭo naśyati' (The pot perishes), the *ākhyāta* can on no account mean effort or operation

conducive to a certain result. Raghunātha maintains that here the secondary meaning of the *ākhyāta* is counterpositiveness (*pratiyogitva*) ; i.e. the *ākhyāta* merely indicates that the pot is the counterpositive of destruction. The discerning reader may note that Raghunātha partially admits the claim of the Prābhākara Mīmāṃsakas.

These views of Raghunātha did not remain unchallenged. After Raghunātha, the Prābhākara school of Mīmāṃsā began to dwindle away, and the fortune of the Bhāṭṭa school of Mīmāṃsā was also on the decline. The Grammarian school, however, continued to exert its influence through able exponents like Koṇḍabhaṭṭa and Nāgeśa. These grammarians have tried to refute the view of Raghunātha, and one cannot ignore their criticisms. For an excellent discussion of these criticisms, one may consult *Philosophy of Language* by Pradip Kumar Mazumdar.[11]

IV

ĀKHYĀTAVĀDAVYĀKHYĀ OF RĀMABHADRA

In *Vaṅge Navya-Nyāya Carcā* of D. C. Bhattacharya, we come across the names of the following Naiyāyikas who commented on *Ākhyātavāda* of Raghunātha.

(1) Rāmakṛṣṇa Bhattācārya Cakravartī (p. 270)
(2) Kṛṣṇadāsa Sārvabhauma (p. 115)
(3) Bhavānanda Siddhāntavāgīśa (p. 135)
(4) Mathurānātha Tarkavāgīśa (p. 156)
(5) Jayarāma Nyāyapañcānana (p. 280)
(6) Viśvanātha Siddhāntapañcānana (p. 276)
(7) Rāmacandra Nyāyavāgīśa (p. 175)
(8) Rudra Nyāyavācaspati (p. 274)
(9) Raghudeva Nyāyālaṅkāra (p. 279)
(13) Rūpanārāyaṇa (p. 191)

The commentaries of these scholars, with the exception of those of Mathurānātha and Rāmacandra, are yet to appear in print.

Among these commentators, Rāmakṛṣṇa and Kṛṣṇadāsa might be the senior contemporaries of Rāmabhadra, and Bhavānanda might be his junior contemporary. Mathurānātha and Jayarāma were his students, and Viśvanātha, Rāmacandra, Rudra and Raghudeva were definitely junior to him. We cannot, however, settle the relative priority of Rāmabhadra and Rūpanārāyaṇa.

Under these circumstances, it is hardly surprising that Rāmabhadra rarely refers to the earlier commentaries on *Ākhyātavāda*. We come across such references on seven occasions,[12] and on four occasions, Rāmabhadra has criticized these views.[13] The commentary is brief, and attempts primarily at explaining *Ākhyātavāda*. On some occasions, he has also criticized the views of Raghunātha,[14] and this confirms to some extent the conjecture of D. C. Bhattacharya that Rāmabhadra did not belong to the group that followed Raghunātha.[15] This also shows that Rāmabhadra was a commentatory of independent spirit. He has also noted some variants in *Ākhyātavāda*, and given his judgement about them.[16]

Further research is essential for determining the indebtedners of Rāmabhadra to the earlier commentators. Mathurānātha, being the student of Rāmabhadra, sometimes agrees with the latter,[17] but his own commentary is much more extensive, and far outshines the commentary of his teacher.

V

THE CRITICAL APPARATUS AND METHOD OF EDITING

The present edition of *Ākhyātavādavyākhyā* is based on a single manuscript found in a bundle that also contained manuscripts of *Nyāyarahasya* and *Padārthatattvanirūpaṇavyākhyā* of Rāmabhadra, *Ānvīkṣikītattvavivaraṇa* of Jānakīnātha Cuḍāmaṇi, the father of Rāmabhadra and *Ratnavallī* of Rāghava Pañcānana, the elder brotuer of Rāmabhadra. The discovery of *Ākhyātavādavyākhyā* and *Ratnavallī* was communicated by us in a paper presented at the 29th Session of All-India Oriental conference.[18]

We now give a brief description of the manuscript utilised by us (since the edition is based on this manuscript alone, we do not mention its beginning, end or colophon) :

Substance : Country-made yellowish paper.
Size : 14″ × 2½″.
Folia : 1a-18a.
Lines : Seven to a page, the last page containing three lines.
Extent : 430 Ślokas.
Character : Bengali.
Appearance : Old.
Other remarks : Complete, usually incorrect.
Post-Colophon : Śubhamastu...(torn) 1540, I Māgha.

The left margins of the folia are numbered correctly. The writing is neat and bold. The manuscript contains several lacunae, which have been filled up by marginal insertions indicated by *kākapada*-s. A portion of Raghunātha's *Ākhyāta-vāda* and explainatory comments are also found in the margins —all written in a different hand (similar features also characterize the manuscript of *Pādarthatattvanirūpaṇavyākhyā* found in the same bundle). The name of the book does not appear on the margin—instead, we find 'Śrīḥ' written on the left margins of the reverse side of the folia. A perforated square blank space has been left out at the centre of each folio. The edges have been damaged and discoloured, and some marginal insertions, comments and corrections have become too faint to be deciphered. Brown pigment has been used for erasures.

The last folio is damaged at a vital place, making it difficult to decide whether the number 1540 refers to Śaka or Vikrama era. It should, however be noted that the manuscsipt of *Nyāyarahasya* found in the same bundle is dated Śakābda 1540. Moreover, the date Vikrama Samvat 1540 is not consistent with the date of Rāmabhadra. We are, therefore inclined to place the manuscript in Śakābda 1540.

A few remarks about the editiorial method adopted here may not be out of place. Our text of *Ākhyatavāda* (printed

in shorter passages) is based on two sources, *viz.* the printed text of *Ākhyātavāda*, with the commentaries of Mathurānātha and Rāmcandra, which was printed as an appendix to *Tattvacintāmaṇi* with several commentaries under the editorship of MM Kāmākhyānātha Tarkavāgīśa, (Calcutta : Asiatic Society, 1884—1901, Vol. IV, pp. 867—1009), and the fragment of *Ākhyātavāda* written on the margins of *Ākhyātavādavyākhyā*. These sources have been assigned the *sigla* A and M respectively. Readings supported by Rāmabhadra have been preferred, but we have also consulted the readings accepted by Mathurānātha and Rāmacandra. We have split up the text into passages, and in this, we have been guided by the remarks of Rāmabhadra. We have also added some punctuations in *Ākhyātavāda* and *Ākhyātavādavyākhyā*. Usual editorial practices have been adopted in editing the commentary.

REFERENCES

1. *Vaṅge Navya-Nyāya Carcā*—D. C. Bhattacharya (Calcutta, Bangiya Sahitya Parishat, 1952), p. 97. Henceforth, this book will be referred to as VNNC.
2. VNNC, p. 82.
3. Published in the Sarasvati Bhavana Series, Varanasi.
4. Published in the Bibliotheca Indica Series, Calcutta.
5. VNCC, p. 112.
6. *History of Navya-Nyāya in Mithilā*—D. C. Bhattacharya (Darbhanga : Mithila Research Institute, 1958) p. 197. VNCC, p. 106.
7. VNCC, p. 107.
8. VNCC, pp. 125-128.
9. *Tattvacintāmaṇi* of Gaṅgeśa Upādhyāya with several commentaries, edt. Kāmākhyānātha Tarkavāgīśa, (Calcutta : Asiatic Society, 1884—1901, Vol. IV, pp. 819—853).
10. VNCC, p. 83.
11. *The Philosophy of Language*—Pradip Kumar Mazumdar, (Calcutta : Sanskrit Pustak Bhandar, 1977), pp. 75-81.
12. Present edition, pp. 1, 4, 6, 23, 25, 33, 35.
13. Present edition, pp. 6, 23, 33, 35.
14. Present edition, pp. 4, 7, 11, 15, 21, 26.
15. VNCC, p. 102.
16. Present edition, pp. 1, 11, 24.
17. See *Summary of Papers*, AIOC, Poona Session, 1978.

॥ आख्यातवादः ॥

[1]आख्यातस्य यत्नो वाच्यः[2], 'पचति पाकं करोती'त्यादियत्नार्थक-करोतिना सर्वाख्यातविवरणात् ।

॥ आख्यातवादव्याख्या ॥

॥ ओँ नमो गणेशाय ॥

तातस्य तर्कसरसीरुहकाननेषु
चूडामणेर्दिनमणेश्चरणौ प्रणम्य ।
श्रीरामभद्रसुकृती कृतिनां हितार्थ-
माख्यातवादं परिशीलितमातनोति ॥

आख्यातस्येति । अत्र च तिप्त्वादिकमेव शक्ततावच्छेदकम्, तेन रूपेण ज्ञातादेवाख्यातादर्थावगतेः, स [? न] तु तिवाद्यन्यतमत्वं तिवादिमात्रविशेष्यकबुद्धि-विषयत्वम् आख्यातपरिभाषाविशेषविषयत्वं वा, आख्यातत्वं विनापि तेन रुपेण ज्ञाने ततोऽर्थप्रत्ययादित्यवधेयम् । **यत्नो वाच्य** इति । न च व्यापारशक्ति-वादिनाऽपि यत्नवाच्यत्वोपगमादयुक्तमिदमिति वाच्यम्, अन्वयितावच्छेदकस्य स्वरूपसम्बन्धविशेषावच्छेदकतया अपि क्वचिच्छाब्दबोधेन संसर्गमर्यादया विषयी-करणात् यत्नत्वस्य वाऽवच्छेदकतया निर्वहतीति न वक्ष्यमाणसिद्धान्तकल्पद्वय-विरोधः । आख्यातस्येत्यनन्तरं यत्नत्वेनेति पूरणीयम्—इत्यपि **केचित्**[3] । **करोतिना** कृञ्धातुना । तृतीया भेदे । **सर्वेति** । सर्वैः प्रामाणिकैराख्यातस्य विवरणादित्यर्थः । न तु सर्वाख्यातस्य विवरणादित्यर्थः, 'पाकं करोती'त्यनेन 'अपचदि'त्यादेरविवरणात् । यत्समानार्थकतया यद् बोध्यते तत्तस्य विवरणम्, भवति च 'पचति' पदस्य स्वपरत्वात् 'पाकं करोती'ति शब्दस्य च 'पाकं करोती'ति शब्दसमानार्थकरूपवत्त्वात्तयोरभेदान्वयबोधः, इतरपदसमभिव्याहारेण चरमपद एव तत्तदर्थलक्षणाभ्युपगमात् । एवं 'पच्'पदं पाकसमानार्थं तिप्पदं कृञ्समानार्थकमित्यादिबोधोऽपि । एवञ्चाख्यातं यत्नविशिष्टवाचकम्, यत्नत्व-विशिष्टार्थकेन प्रामाणिकविवरणात्, यत्नत्वविशिष्टार्थकपदसमानार्थकतया

---

1. श्रीराम: in M in excess.
2. यत्नवाचकत्वं A. Reading here after commentary.
3. Here we find a marginal insertion that is too faint to be deciphered.

व्यवहारादिव बाधकं विना विवरणादपि व्युत्पत्तेः, 'किं करोती'ति यत्नप्रश्ने 'पचती'त्युत्तरस्य[4] यत्नार्थकत्वं विनाऽनुपत्तेश्च । अचेतने 'रथो गच्छती'त्यादौ च[5] अनुकूलव्यापारे लक्षणा ॥१॥

प्रमापितत्वात्, यत्किञ्चित्पदजन्ययत्नत्वविशिष्टबोधसमानविषयजनकतया प्रमापितत्वादि यावदिति । प्रयोग :—यत्नत्वमाख्यातवाच्यतावच्छेदकम् [fol. 1 ends] आख्यातविवरणजन्यबोधप्रकारकत्वात्, तथा च यो यद्विवरणजन्यबोधविषयो भवति स तच्छक्यतावच्छेदको भवतीति सामान्यतौ [? ०तो] व्याप्त्या वा प्रयोगोऽवसेयः ।

[6]ननु विवरणस्य प्रमाणान्यत्वात् कथं तेन व्याप्तिग्रह इत्यत आह—**व्यवहारादिवे**ति । तथा च व्यवहारस्य यथाऽनुमानविधया शक्तिग्राहकत्वं तथा विवरणस्येति भावः ।[6] ननु 'जानाति यतत' इति विवरणविषये लाक्षणिकजानातीत्यादौ व्यभिचारः प्रथमे, द्वितीये तु गङ्गायां तीरे, 'जानाति ज्ञानाश्रय' इत्यादिविवरणप्रकारे तीरत्वादावेव व्यभिचार इत्यत आह—**बाधकं विने**ति । बाधकमन्यलभ्यत्वं तथा च प्रथमे लक्षणया शक्तिभ्रमेण च 'तद्धर्मविशिष्टबोधकत्वे सती'ति विशेषणाल्लक्षणाज्ञानशक्तिभ्रमाजन्यत्वेन समानविषयकबोधविशेषणत्वे न व्यभिचारः । द्वितीये तु लक्षणाज्ञानेन शक्तिभ्रमेण च 'आख्यातबोध्यतानवच्छेदकत्वे सती'ति विशेषणान्न दोष इति भावः† । ननु 'पाकयत्नवानि'तिवत् 'पाकं करोती'त्यपि तात्पर्यस्यैव विवरणं न त्वाख्यातस्येत्यत आह—**किं करोती**ति । 'किंविषयककृतिमानि'ति प्रश्ने 'पाकविषयककृतिमानि'त्युत्तरस्यैवोचितत्वात्, प्रश्नोत्तरयोः समानविषयकत्वादिति भावः । **यत्नार्थकत्वं** यत्नत्वविशिष्टशक्तत्वम्, अत्रापि **बाधकं विने**त्यनुषञ्जनीयम् । एवञ्च—आख्यातं यत्नत्वविशिष्टवाचकम्, असति बाधके यत्नत्वविशिष्टे जिज्ञासायाः संशयस्य वा निवर्तकस्य ज्ञानस्य जनकपदत्वादित्यनुमानप्रकारोऽवसेयः । ननु 'रथो गच्छती'त्यादिप्रयोगानुपपत्त्याऽनुकूलव्यापारादावाख्यातशक्तेर्यत्नविवरणादिकं लक्षणादिनैवेत्यसिद्धविशेषणो हेतुरित्यतः **प्राचां** मतेन तत्रान्यथोपपत्तिमाह—**अचेतन** इति । **गच्छती**त्यादिपदात् त्यजतीत्यादिपरिग्रहः ॥१॥

---

4. ० त्याद्युत्तरस्य A. Reading here after M and in the light of commentary.
5. ० त्यादावनुकूल० M. Reading here after A.
6-6. Following a marginal insertion.
† After this, the words व्युत्पत्तेः शक्तिग्राहकत्वात् has been put in brackets. Does not seem to be part of commentary.

अन्यदीयगमनानुकूलनोदनादिमति 'गच्छती'त्यप्रयोगात्, 'जानाती-च्छति[7]-यतते-द्वेष्टि-विद्यते-निद्राती'[8]त्यादौ च क्रियानुकूलकृति-व्यापाराश्रययोरप्रतीतेः गत्यादिमत्त्वमात्र[9]प्रतीतेश्चाश्रयत्वे[10] 'नश्यती'त्यादौ प्रतियोगित्वे निरूढ़लक्षणा[11], 'चैत्रः पचति तण्डुलः', 'मैत्रः पच्यते तण्डुलः' इत्यादावन्वयाबोधात् धात्वर्थप्रातिपदिकार्थयो-र्भेदेन साक्षादन्वयस्याव्युत्पन्नतया सम्बन्धमर्यादया तद्भानस्यासम्भवा-दिति तु नव्याः[12] ॥२।

प्राचीनमतदूषणपूर्वकं स्वमतेन तामाह—**अन्यदीये**त्यादिना **नव्या** इत्यन्तेन । **नोदनादिमती**ति । निश्चल इति शेषः । **अप्रयोगादि**त्यादेरा**श्रयत्वे निरूढ़-लक्षणे**त्यनेनान्वयः । [fol. 2a ends] ननु व्यापारे गमनस्य वैशिष्ट्येनाप्य-न्वयाद्गमनस्य विशिष्टव्यापारस्य च निश्चले विरहान्नायमतिप्रसङ्ग इत्यत आह—**जानाती**ति । तथा चावश्यकल्प्याश्रयत्वनिरूलक्षणयैवोपपत्तौ नानुकूव्यापार-निरूढ़लक्षणा कल्प्यत इति भावः । द्वेषान्तानामनुकूलो यत्नः सम्भवेदपि, यत्नान्तानामनुकूलव्यापार आत्ममनोयोगादिरेव सम्भवति, नापि नाड़ीविशेष-मनःसंयोगात्मिकाया निद्राया इव तदनुकूलमनःक्रियादेरपि परम्परया चैत्राद्या-श्रितत्वं कदाचिदुपगन्तुं शक्यमपीति तावदुपन्यासः । ननु 'जानाती'त्यादौ आश्रयत्वस्येव 'रथो गच्छती'त्यादौ अनुकूलव्यापारस्यापि प्रत्ययात् तत्रापि निरूढ़लक्षणापत्तिर्दुर्वारेत्यत आह—**गत्यादिमत्त्वे**ति । आदिपदेन 'रथस्यजती'-त्यादौ त्यागादेः परिग्रहः[13] । अत्र ज्ञानादीनां निरूपितत्वविशेषणेनै-

---

7. Mathurānātha has noted and rejected a variant : "जानाती-त्यस्य पूर्वं गच्छतीतिः पाठः प्रामादिकः"—TCM, IV, p. 880.
8. Mathurānātha has suggested a change in the order : वस्तुतस्तु विद्यत इत्यस्य पूर्वं निद्रातीति पाठः"—TCM, IV, p. 878.
9. Mathurānātha has noted a variant : "क्वचिच्चात्र मात्रसम्बलितो न पाठः"—TCM, IV, p. 880.
10. ० प्रतीतेश्च प्रयत्ने M. Reading here after A, which is supported by the commentary.
11. निरुढ़िलक्षणा A. Reading accepted is in M, and is supported by commentary.
12. ० दिति नव्याः A. Reading here after M.
13. Mathurānātha supports this interpretation, and supplies a reason : आदिपदार्थस्त्यजतीत्यादौ त्यागादेः परिग्रहः, नः तु पूर्वोक्तेषु जाना-तीत्यादौ ज्ञानादेः परिग्रहः, मात्रांशस्य पुनरुक्ततापत्तेः"—TCM, IV, p. 880.

वाश्रयत्वेऽन्वयस्य साकाङ्क्षत्वात् 'घटो जानाती'त्यादयो न प्रयोगाः, देहस्याप्यवच्छेदकतया ज्ञानाद्याधारत्वात् 'चैत्रो जानाती'त्यादेर्नानुपपत्तिरित्यवधेयम् । आश्रयत्वस्य संसर्गविधया भानमङ्गीकुर्वताऽपि 'नश्यती'त्यादौ प्रतियोगित्वे लक्षणा दुर्वारा, तत्र प्रकारीभूय तदनुभवस्य सर्वसिद्धत्वात्, 'न नश्यती'त्यादौ नञर्थान्वयानुरोधाच्च, प्रतियोगित्वसम्बन्धस्य प्रतियोगितानवच्छेदकत्वादित्यभिप्रायवानाह—**नश्यतीत्यादा**विति । **निरूढा** अनादिप्रयोगवती **लक्षणा**। आश्रयत्वप्रतियोगित्वत्व(? ०गित्व)योरतिरिक्तत्वमते तु तत्रापि शक्तिर्दुर्वारा, गौरवाभावादित्यवधेयम् । नन्वाश्रयत्वादेः संसर्गविधयैव भानसम्भवात् प्रकारीभूय तदनुभवस्य च सिद्धेर्न तत्र निरूढलक्षणेति वर्तमानत्वादिकमेवाख्यातार्थ [fol. 2b ends] इत्यत आह—**चैत्र** इति । तादृशव्युत्पत्त्यनादरे कर्मत्वकर्तृत्वसंसर्गेण तण्डुलमैत्रयोः पाकेऽन्वयबोधस्य दुर्वारत्वादिति भावः । विभक्त्यर्थधात्वर्थयोर्भेदेनान्वयादुक्तं—**धात्वर्थे**त्यादि । **प्रातिपदिके**ति । नञाद्यतिरिक्तप्रातिपदिकेत्यर्थः । 'स्तोकं पचती'त्यादौ स्तोकाभिन्नपाकानुभवात् स्तोकपाकयोरभेदान्वयादुक्तं **भेदेनेति** । अभेदातिरिक्तसम्बन्धेनेत्यर्थः । अभेदस्तादात्म्यमपि (?) नामार्थान्वितस्य विभक्त्यर्थस्य धात्वर्थेऽन्वयेन परम्परान्वयादुक्तं **साक्षादिति** । 'ओदनं पक्त्वा (?०क्ता) पक्ष्यत' इत्यादौ च पाके कर्मत्वसंसर्गेण नोदनस्यान्वयः, किन्तु ओदनपदोत्तरप्रथमाया एव कर्मत्वमर्थः, 'प्रधानशक्त्य[न]भिधाने गुणशक्तिरभिहितात् प्रकाशत' इत्यनुशासनस्य तत्रैव तात्पर्यात् । अतएव **गुरुमते** 'स्वर्गकामो यजेते'त्यादौ धात्वर्थेऽपि यागे प्रथमार्थनियोज्यत्वद्वारेणैव स्वर्गकामस्यान्वयो न तु नियोज्यत्वसम्बन्धेन, धात्वर्थनामार्थयोः भेदेनान्वयस्याव्युत्पन्नत्वात् । **परे** तु 'ओदनं पक्त्वा भुज्यत' इत्यत्र पच्धातुरेवोदनकर्मपाके लाक्षणिकः, ओदनपदं तत्र तात्पर्यग्राहकं ; पाकत्वप्रकारेणैव वा तात्पर्यवशात् तादृशपाकस्यैव शक्त्या बोधकत्वं, तथैवाकाङ्क्षाकल्पनादित्याहुः । **नव्या** इति । अत्र वदन्ति—कर्मत्वकर्तृत्वादिसम्बन्धेन धात्वर्थे नामार्थान्वये नामोत्तरद्वितीयातृतीयादेर्नामार्थे धात्वर्थान्वये च धातूत्तरतादृशाख्यातादेः सहकारित्वादनतिप्रसङ्गेन संसर्गविधया सम्भवत्येव तद्भावनं (? ०भानं), द्वितीयादेराख्यातादेश्च कर्मत्वाद्यर्थकत्वस्वीकारस्तु तत्प्रकारकानुभववलादेव, आश्रयत्वादेः प्रकारता च नानुभवसिद्धा, कदाचित्तदनुभवे वा कादाचित्की लक्षणा न वार्यते । आख्यातस्येव तदन्तर्धातौ[? ०धातो०]रप्यर्थस्य [?०र्थश्च] विशेष्यतयाऽन्वययोग्यः प्रथमान्तपदोपस्थाप्य एव, एवञ्च 'ज्ञायते घटः' इत्यादौ विषयत्वमपि नाख्यातार्थः । नन्वेवं नाम्न एव तण्डुलकर्मत्वादौ धातोरेव च पाककृत्यादौ लक्षणयैव तत्प्रकारकबोधसम्भवात् स्वपतितं [? सुना गतं] प्रत्ययमात्रस्य वा

कृञश्च यत्नाभिधायकत्वं, क्रियाजन्यत्वप्रतिसन्धानाविशेषेऽपि यत्न-जन्यत्वाजन्यत्यप्रतिसन्धानात् पटाङ्कुरयोः कृताकृतव्यवहारात्, ज्ञात्रादिवदाश्रयपरतृजन्तकर्तृपदस्य यत्नाश्रयबोधकत्वाच्च[14] । क्रियायास्तदनुकूलव्यापारस्य वा कृञर्थत्वे तदाश्रयः कारकमात्रं वा कर्तृपदार्थः स्यात् । अथ 'रथो गच्छति गमनं करोति', 'वीजादिना शक्तिर्विलीयेत, केवलयोर्नामधात्वोरर्थप्रत्ययाच्च न वैपरीत्यं । कर्मधारयगर्भ-तत्पुरुषादाविव 'स्विन्नं तण्डुलं[15] पचती'त्यादावप्येकदेशेप्यभेदेनान्वयो विशेषण-पदसमभिव्याहारेण विशिष्ट एव वा लक्षणेति चेन्न, तादृशलक्षणाप्रतिसन्धान-मन्तरेण तादृशबुद्धेरानुभविकत्वात् । यदि च 'चैत्रः पचति तण्डुलमि'त्यादौ सुवादितः कर्मत्वकृत्याद्युपस्थितिमन्तंरेण तत्संसर्गेणाप्यन्वयाप्रतीतेः [fol. 3a ends] तादृशान्वयबोधे विभक्तिविशेषजन्यतदुपस्थितेर्हेतुत्वकल्पने चातीवगौरवात् विभक्तितस्तदुपस्थितावपि तत्संसर्गेणान्वयप्रतीतेर्वा तथाविधा व्युपत्तिराद्रियते, आद्रियतां तत्रैव, न तु 'जानातीत्या'दौ, मानाभावात् । धातुत्वस्यैकस्याभावेन विशेष एव तद्विश्रामात् 'चैत्रो जानाती'त्यादावाश्रयत्वादिप्रकारककादाचित्-कबोधोपयोगिधात्वाख्यातादिसाकाङ्क्षत्वकल्पनयैवोपपत्तौ अतिरिक्तकार्यकारण-भावकल्पनागौरवेण तत्संसर्गकबोधवारणे च वैपरीत्यमेव ज्यायः, क्वाचित्क-तथानुभवस्य सन्दिग्धत्वाल्लक्षणाद्यकल्पनाच्च । ज्ञानादेरव्याप्यवृत्तित्वात् ज्ञाना-दिमत्यपि 'न जानाती'ति प्रयोगापादनन्तु 'पचत्यपि न पचती'त्यादिप्रयोगापादनेन तुल्यं तुल्यसमाधानञ्चेति न तदर्थबोधेनापि तत्र लक्षणा, अव्याप्यवृत्त्यधिकरण-ताया अव्याप्यवृत्तित्वाच्चेति दिक् ।।२।।

प्रश्नविवरणयोः कृञर्थक्रियादिविषयत्वाद्धेतुद्वये विशेष्यासिद्धिं परिहरति—**कृञश्चे**ति । **क्रिये**ति । अवयवसंयोगादिलक्षणक्रियेत्वर्थः । अङ्कुरस्य **नैयायिकनये** ईश्वरकृतिजन्यत्वात् **प्रतिसन्धाने**त्युक्तम् । **कृताकृते**ति । 'पटः कृतः अङ्कुरो न कृत' इति **मीमांसक**व्यवहारादित्यर्थः । क्रियायाः कृञर्थत्वे तत्र तदानीं तेषामकृतव्यवहारानापत्तेरिति भावः । नन्वङ्कुरादावकृत-व्यवहारोऽसिद्ध एव, 'बीजेनाङ्कुरः कृत' इति विपरीतव्यवहारस्यैव दर्शनादित्यत आह—**ज्ञात्रादिवदि**ति । क्रियायाः कृञर्थत्वे 'पाकं करोतीत्यादौ पाकादिना सम[म]येदेनान्वयः, अनुकूलव्यापारस्य तदर्थत्वे द्वितीयादेरेव निरूपितत्वमर्थः इत्यवधेयम् । प्रथमे दूषणमाह [fol. 3b ends]—**तदाश्रय** इति । क्रियाश्रय

---

14. च om M.
15. स्विन्नतण्डुलः = parboiled rice.

अङ्कुरादिः कृतः' इति विनाऽपि यत्नं कृञः प्रयोगान्न तस्य यत्नवाचकत्वं, कर्तृपदे च कृञो यत्ने निरूढ़लक्षणा[16] यदि क्रियाद्याश्रयमात्रे[17] न तत्प्रयोगः, एवञ्चाचेतनेऽपि 'पचती'त्यादिप्रयोगात् क्रियानुकूलव्यापारप्रतीतेर्बाधकं विना गौणत्वायोगात् जनकव्यापार एवाख्यातार्थः, तण्डुलक्रयणादेश्च[18] न पाकादिजनकत्वमिति नातिप्रसङ्गः ।

कथन्तर्हि 'पचती'त्यादौ पाकजनकयत्नानुभव इति चेत्, यत्नाविनाभूतपाकादिना क्रियाविशेषकारणस्य[19] यत्नस्यानुमानात् । 'पचति पाकविषयकयत्नवान्'[20] इति तात्पर्यविवरणम् । अन्यथा धर्मिणोऽपि[21] वाच्यतापत्तेः । अथैवं वर्तमानत्वं यत्नस्य न प्रतीयेत, तस्यापदार्थत्वात्, अन्यत्र धात्वर्थक्रियायां स्वार्थव्यापारे वा लड़ादेर्वर्तमानत्वाद्यनुभावकत्वस्य व्युत्पन्नत्वाच्च[22] । न च पाकजनकव्यापारेण[23]

इत्यर्थः । तथा च 'तण्डुलः पाककर्त्ते'त्येव व्यवहारः स्यान्न स्यात् 'चैत्रः पाककर्ते'ति व्यवहार इति भावः । द्वितीये दूषणमाह—**कारकमात्रेवे**ति । स्थालीकाष्ठतण्डुलादेरपि पाकानुकूलव्यापारसंयोगवत्त्वात् तत्रापि चैत्र इव पाककर्तृत्वव्यवहारापत्तिरिति भावः । **यदी**ति । रथादौ गमनकर्तेत्यादेः, स्थाल्यादेरपि विवक्षावशात् पाककर्तेत्यादेर्व्यवहारस्य त्वयाप्यभ्युपगमात् यदीत्युक्तम् । **क्रियादी**त्यादिपदादनुकूलव्यापा[रा]दिपरिग्रहः । **एवञ्चे**ति । यत्नत्वविशिष्टे शक्तिसाधकहेतोरसिद्धत्वे चेत्यर्थः । ननु तथापि विनिगमकाभावेन शक्तिसाधकहेतोरेव यत्नत्वविशिष्टे शक्तिः सेत्स[? ०स्य]तीत्यत आह—**अचेतने**ऽपीति । काष्ठादावित्यर्थः । 'रथो गच्छती'त्यादावाश्रयत्वप्रतीतेरेवोक्तत्वात् तच्च [? तस्य] परित्यागः । **अनुकू**लेति । अनुकूलव्यापारत्वविशिष्ट एवेत्यर्थः । नन्वेवं तण्डुलक्रयणादेरपि पाकानुकूलत्वात् तत्काले 'पचती'ति प्रयोगः स्यादित्यत आह—**तण्डुले**ति ।

यत्नानुभवः यत्नत्वविशिष्टानुभवः । **यत्नाविने**ति । अत्र यत्नस्य कारणत्वसम्बन्धेन साध्यत्वं, पाकादेस्तादात्म्यसम्बन्धेन हेतुत्वं, तथा च—पाको यत्नवान् पाकादित्यनुमानात् 'पाके यत्न' इत्यादि साध्यविशेष्यकानुमितिरिति भावः । यत्तु—पाकादेर्यत्नजन्यत्वं साध्यमिति, तन्न, यत्नाविनाभावप्रदर्शनानुपपत्तेः, पाक-

---

16. निरूढ़िलक्षणा A. 17. क्रियाश्रय० M. 18. च om M.
19. ० विशेषेण कारकस्य M. 20. पाकयत्न० M. 21. अपि om M.
22. ० भावकत्वव्युत्० A. 23. पाकजनकव्यापारेण om A.

पाकजनकवर्तमानयत्नानुमानं, यत्नविगमेऽपि व्यापारानुवृत्तेः। धर्मिविशेषनिष्ठता च यत्नस्य न स्यात्, तद्व्यधिकरणव्यापारस्यापि पाकजनकत्वात्। चैतन्याविनाभूतचैत्रत्वादिविशेषितेन तेन यत्नानुमानमिति चेत्, सत्यं,[24] चैत्रत्वाद्यप्रतीतावपि 'शोभनं[25] पचती'त्यादौ शोभनादेः पाकयत्नवत्त्वप्रतीतेः[26] तत्राख्यातस्य जनकयत्ने लाक्षणिकत्वात्।

यत्न-इत्यादिविलक्षणज्ञानालाभाच्च। **तात्पर्येति**। तथा च 'पाकजनकयत्नवानि'ति शब्दस्य पाकजनकयत्नवानितितात्पर्यक इत्यर्थः। **अन्यथेति**। 'पचति'शब्दविवरणत्व इत्यर्थः। **धर्मो** यत्नाश्रयः। **प्रतीयेतेति**। आख्यातार्थवर्तमानत्वस्य यत्नेऽनन्वयापत्तेरिति भावः। **तस्य** यत्नस्य। **अर्थाध्याहारवादिमतमवलम्ब्य** कदाचिदपदार्थेऽप्यन्वयस्य वक्तुं शक्यत्वादाह—**अन्यत्रे**ति। **अन्यत्र** 'जानाती'त्यादौ। **धात्वर्थक्रियायां** 'पचती'त्यादौ। **अर्थे** व्यापार इत्यर्थः। **यत्नविगमे**ऽपीति। संयोगाद्यात्मकपाकजनकवर्तमानव्यापारवत्यपि चैत्रादौ पाकजनकयत्नाभावाद् व्यभिचार इति भावः। नन्वत्र धात्वर्थ एव वर्तमानानत्वा[?० मानत्वा०]न्वयात् वर्तमानपाकेन च कारणस्य वर्तमानयत्नस्य पूर्ववदनुमानं, स्थूलकालमादाय वर्तमानत्वोपादानाच्च न दोष इत्यत आह—**धर्मी**ति। चैत्रादिनिष्ठतेत्यर्थः। ननु चैत्रः पाकजनकयत्नवान् पाकजनकव्यापारादित्यनुमानात् तत्प्रत्यय इत्यत आह **व्यधिकरणे**ति। यत्नव्यधिकरणस्यापि स्थाल्यादिसंयोगस्येत्यर्थः। तथा च स्थाल्यादौ व्यभिचारान्न तथानुमानमिति भावः। अचेतनेऽपि चैत्रादिसङ्केतसत्त्वादुक्तम्—**चैतन्याविने**ति। तेन पाकजनकव्यापारेण प्रतीतेरिति। शाब्दतादृशयत्नप्रतीतेरानुभविकत्वाच्चेत्यपि मन्तव्यम्। एतेन यत्ननिष्ठेऽनुकूलत्वे यन्निरूपितत्वं तेन संसर्गेण पाकादेरनुकूलत्वेऽन्वयबोधस्याप्यभ्युपगमात् अभि[? ०अवि]चारसमर्थनं प्रत्युक्तम्, प्रत्युक्तञ्च **नैयायिकानां** मानसतादृशज्ञानसमर्थनमपि। **जनके**ति। अखण्डे व्यापारत्वे मानाभावाददृष्टादीतरत्वे सति जन्यत्वम् [? जनकत्वम्] अपेक्ष्य लाघवेन यत्नत्वस्य शक्यतावच्छेदकेऽन्तर्भावात्, इतरथा व्यापारत्वघटकानेकपदार्थे शक्तेः सम्बन्धकल्पने गौरवापत्तेरिति भावः। शक्यतावच्छेदके शक्तेरनभ्युपगमे तु यत्न इव [fol. 4b ends] व्यापारेऽपि शक्तिर्दुर्वारा, कादाचित्कस्य व्यापारत्वेन शक्तिग्रहस्य भ्रमतयोपवर्णयितुमशक्यत्वादिति मन्तव्यम्। **लाघवादिति**। जनकयत्ने जनकत्वस्य तवापि निवेशादिति भावः। ननु तवापि पाकजनकादृष्टजनककृतिकाले 'पचती'ति प्रयोगापत्तिः, तत्कृतेरप्यदृष्टद्वारा पाकजनकत्वात्,

---

24. सत्यं om M. 25. शोभनः M. 26. प्रतीतिरेति चेत् सत्यं M.

मैवम्, जनकव्यापारमपेक्ष्य[27] लाघवेन[28] जनकयत्नस्यैव शक्यत्वात् । यत्नं विहाय जनकत्वमात्रे शक्तिरस्तु लाघवात्, तथा चाचेतनेऽपि प्रयोगो मुख्य एवेति चेन्न, अपचत्यपि पाकजनकादृष्टवति 'पचती'ति प्रयोगापत्तेः । पाकजनकादृष्टजनककृतेश्च[29] न पाकजनकत्वं मानाभावात् । अतएव क्षित्यादेः कृत्यादिजन्यत्वे साध्ये तज्जनकादृष्टजनककृत्यादिना अर्थान्तरप्रसङ्गोऽपि प्रत्युक्तः । भावे वा तादृशकृतिनिवारणा[30]यादृष्टद्वारकजनकताया[31]स्त्वयाऽपि वाच्यत्वात् । यत्नमात्रं शक्यं विषयित्वं जनकत्वं वा संसर्गमर्यादया[32] भासत इति तु नव्याः ।।३।।

जनकताविशेषनिवेशस्तु न ममापि पाणिपिहित इत्यत आह—**पाकजनके**ति । **अतएव** अदृष्टद्वारा कृतेर्जनकत्वाभावादेव । **कृत्यादी**त्यादिपदादिच्छाज्ञानपरिग्रहः । कार्यत्वादिना **साध्ये** । न चातिरिक्तधर्मिकल्पनागौरवादस्मादेवानुमानात् तत्सिद्धिरिति प्रसङ्गो दुर्वार एव, अनन्ततादृशकृतीनां जनकत्वकल्पनापेक्षया जनकैककृतिकल्पनाया लघुत्वात्, ईश्वरकृतेः प्रमाणान्तरसिद्धत्वाच्च । अभ्युपेत्याह—**भावे वे**ति । **निराकरणाये**ति । अन्यथा तवापि तदा तादृशप्रयोगापत्तेरिति भावः । ननु निरूपितत्वविशेषसंसर्गेण जनकत्वे धात्वर्थान्वयस्य साकाङ्क्षत्वान्नातिप्रसङ्ग इत्यत आह—**यत्नमात्रमि**ति । **विषयित्वमि**ति । अनुभवबलादुभयोपन्यासः । अतएव जनकत्वस्य नियमादिघटितत्वमतेऽपि गौरवं न दोषाय, अनुभवेन तत्तिरस्कारात् । विषयित्वजनकत्वे तद्विशेषौ, यथाकथञ्चित्पाकविषयककृतिसत्त्वेन स्वरूपयोग्यस्य कृतिमात्रस्यादृष्टजनककृतेश्च सत्त्वेऽपि 'पचती'त्यप्रयोगात् । अतएव कृष्णेन पाकादिकरणदशायाम् 'ईशः पचति', 'कृष्णः पचती'त्यादिप्रयोगवदत्येन पाकादिकरणदशायां न तथा प्रयोगः, कुत्रापि कृतौ [fol. 5a ends] केनापि विषयित्वसंसर्गेण कस्यापि पाकादेरेवान्वयस्य व्युत्पन्नत्वात् । कादाचित्कोऽनुकूलयत्नत्वप्रकारकबोधस्तु लक्षणया शक्तिभ्रमेण वेति हृदयम् ।। ३ ।।

---

27. अभिनाभावमपेक्ष्य A. Reading here after M and commentary.
28. लाघवेन om M. Retained in the light of commentary.
29. च om M.
30. ० कृतिवारण० M, ० निराकरण० in commentary.
31. ० कत्वेन जन० M.
32. सम्बन्धमर्यादया A. Reading here after M.

कर्तृकर्मणी लकारवाच्ये, 'चैत्रः पचति', 'पच्यते तण्डुल' इत्यादौ[33] सामानाधिकरण्यानुरोधात् । अन्यथा 'पचती'त्यादावपि[34] कर्तरि तृतीया, 'पच्यत' इत्यत्र कर्मणि द्वितीया स्यात्, तयोरनभिहिताधिकारीयत्वात्, कृत्यभिधानस्याविशिष्टत्वात् ।

कर्तृकर्मसंख्याभिधानानभिधानाभ्यां नियमः, न चैवं[35] 'चैत्रेण दृष्टो घट' इत्यत्र विनापि तिङं संख्याप्रतीतेः क्लृप्तशक्तेः सुप एव संख्योपस्थितिसम्भवे तिङो न तदभिधायकत्वमिति[36] वाच्यम्, 'चैत्रो मैत्रश्च गच्छत' इत्यादौ विनाऽपि तादृशसुपं द्वित्वादिप्रत्ययात्, लाघवादेकवचनत्वादिनैव एकत्वादौ शक्तत्वाच्च—इत्यपि नास्ति, कृता संख्यानभिधानात् ।

कर्तृकर्मणोराख्यातशक्त्यावश्यकत्वे कृतौ न शक्तिर्मानाभावात् गौरवाच्चेत्यभिप्रायवतो **वैयाकरणस्य** मतमाह—**कर्तृकर्मणी**ति । **लकार** आख्यातम् । **सामानाधिकरण्ये**ति । चैत्रादिशब्दपचत्यादिशब्दयोरेकधर्मिबोधकत्वादित्यर्थः । **अन्यथा** कर्तृकर्मानभिधाने । **तयो**रिति । अनभिहिते कर्तरि तृतीयाया विधानादित्यर्थः । ननु कृत्यभिधानानभिधानाभ्यामेव नियमो भविष्यतीत्यत आह—**कृत्यभिधानस्ये**ति । **अविशिष्टत्वा**दिति । उभयत्रापि समानत्वात् । तथा च 'तण्डुलं पचती'त्यत्र द्वितीया 'चैत्रेण पच्यत' इत्यत्रापि तृतीया न स्यादिति भावः ।

नियामकप्रकारान्तरमाशङ्क्य निराकुरुते—**कर्तृकर्मसंख्ये**त्यादिना **इत्यपि नास्ती**त्यन्तेन । **तदभिधायकत्वमित्यादी**ति । आदिपदेन 'चैत्रो मैत्रो विष्णुमित्रश्च गच्छन्ती'त्यस्य परिग्रहः । एकवचनसत्त्वादुक्तं **तादृशे**ति । **द्वित्वादी**त्यादिपदात् बहुत्वपरिग्रहः । नन्वत्रापि सुप एव लक्षणया द्वित्वादिप्रत्ययः, "सुब्विभक्तौ न लक्षणे"ति प्रवादस्य व्यत्ययानुशासनबलप्रवृत्तस्य तत्तद्विभक्त्यर्थविषयकत्वात् अनुपादेयत्वाद्वा । अतएव द्वितीयादेर्विषयित्वादौ लक्षणोपेयते । एकवचनत्वादिना चैकमेव द्वित्वादिकं प्रत्याज्य-[? ०य्य]-ते इति न चैत्रद्वयमैत्रद्वयादिधीः । किञ्चैवमपि तिङेकवचनस्य नैकत्वे शक्तिः स्यादित्यत आह—**लाघवा**दिति । सुबेकवचनत्वापेक्षया लाघवादित्यर्थः । नन्वेकवचनत्वं नैकशक्तत्वं, तदवच्छेदकापरिचयात्, नापि बुद्धिविषयत्वादि, तेन रूपेण ज्ञानं विनाऽपि सित्वादिना[37]

---

33. इति A. 34. ० त्यत्रापि M.
35. एवं om. M. 36. The commentary accepts ० मित्यादि.
37. सि = सु in the system of Pāṇini.

किञ्च एकत्वादिना संख्याभिधाने[38] न नियमः, पदार्थतावच्छेदकावच्छिन्नस्याकाङ्क्षादिवशात् कर्तृकर्मसाधारण्येनान्वयबोधस्य दुर्वारत्वात्। कर्त्रेक[39]त्वत्वादिना[40]ऽभिधानेऽपि[41] कर्त्रादेरप्यभिधेयत्वं, शक्तो शक्ततावच्छेदकशक्यतावच्छेदकशक्यतावच्छेदकयोश्च[42] गौरवमधिकम्। तस्मादाख्यात्वेन[43] कर्तरि, कर्मणि च आत्मनेपदत्वेन, एकवचनत्वादिना तत्तद्रूपेण वा[44] एकाख्यातस्य च[45] एकत्वादौ[46] शक्तिः।

ज्ञानादर्थप्रत्ययात्, केवलात् 'पचति पचत' इत्यादितः केवलकर्तरि [fol. 5b ends] शक्तेः प्रमया भ्रमेण वा 'एकः पाककर्ते'त्यादिबोधस्यानुभविकत्वात्। आख्यातस्यैकत्वादौ शक्तिः, एवमगृहीतसुपसंख्याशक्तिकानां 'चैत्रः पचती'त्यादितः चैत्रादावेकत्वप्रत्ययात्। **अपीति**। तिङः संख्याशक्तिग्रहो भ्रम इति चेत्, सुप एव स भ्रमे [? भ्रमः] किं न स्यात्, प्रत्येकमादाय विनिगमकाभावेन तिङ्बाहुल्यस्याकिञ्चित्करत्वादिति। **कृतेति**। तथा च कृद्योगे सर्वत्रैव तृतीया स्यान्न तु प्रथमेति भावः। नन्वाख्यातस्य संख्यायाः कृतश्च कर्तृकर्मणोरभिधानानभिधानाभ्यां नियमान्न दोष इत्यत आह—**किञ्चेति**। **न नियम** इति। क्वचित् कर्तर्येव क्वचित् कर्मण्येवेति नियमो नेत्यर्थः। ननु कर्त्रेकत्वादिना शक-[? ०क्य] त्वाद् योग्यतावशादेव नियम इत्यत आह—**कर्त्रेकत्वत्वादिनेति**। [47]**कर्त्रादेरिति**। यद्यपि विशेषणविधया सम्बन्धविधया वा शक्यत्वं तथापि मया मुख्यविधया नाभ्युपेयत इत्यत आह[48]—**शक्ताविति**।

---

38. ० त्वादिसंख्या A. Adopted here after M and in the light of the commentary.
39. कत्रैक० M.
40. Mathurānātha prefers the reading कत्रैकत्वादिना, cf. "···आह कत्रैकत्वादिना। कत्रैकत्वत्वादिनेति पाठस्तु प्रामादिकः"—TCM, IV, p. 920.
41. तु instend of अपि M.
42. च om. A.
43. आख्यातेन A. Reading adopted here after M, and in the light of the commentary.
44-45. Omitted in M. Rāmabhadra's verdict on this reading is not known.
46. The commentary suggests a change in the order of words.
47-48. Inserted according to a marginal insertion.

एकपदोपात्तत्वाच्च[49] संख्याया वाच्यगामित्वं, कर्मकर्तृबोधकत्वञ्च[50] एकदाऽव्युत्पन्नम्,[51] अतएव 'चैत्रः पच्यते तण्डुल' इत्यादयो न प्रयोगाः । कर्तरि यकोऽसाधुत्वाच्च 'पच्यते चैत्र' इत्यादयोऽपि कर्तरि नेति वैयाकरणाः ।। ४ ।।

एकत्वादित्रयकर्तृकर्मपञ्चसु मम पञ्च शक्तयः, तव तु कार्यत्वादिषट्कक्रृतिषु सप्त शक्तय इति शक्तौ गौरवं ; ममैकत्वादिना शक्यत्वं, तव तु कर्त्रेकत्वत्वादिना इति शक्यतावच्छेदके गौरवमित्यर्थः । शक्ततावच्छेदकतायास्तत्तद्रूप एव सर्वमते पर्यवसानात् **शक्यते**त्युक्तम् । उपसंहरति—**तस्मा**दिति । **आख्यातत्वेने**ति । आत्मनेपदस्यापि कर्तृव्यो-[? ०वो]-धकत्वादिति भावः । **आत्मनेपदत्वेने**ति । परस्मैपदस्य कदापि कर्मण्यप्रयोगादिति भावः । एकवचनत्वादिना शक्तत्वे पूर्वोक्तदूषणादाह—**तत्त**दिति । तिप्त्वादिनेत्यर्थः । **एकत्वादा**-वित्यनन्तरं **तत्तद्रूपेण वे**ति युक्तः पाठः, आख्यातत्वादिना शक्तेरपि निवारितप्रायत्वादित्यवधेयम् ।

ननु तवापि संख्यान्वयनियमः [fol 6a ends] कथमित्यत आह—**एके**ति । **वाच्ये**ति । बोध्येत्यर्थः, लक्ष्येऽप्यन्वयात् । अत्रैकपदार्थयोः परस्परान्वयस्य [?० यश्च] साकाङ्क्षत्वान्नियमनतु [?० त्वनियमान्न] । वस्तुतो यस्तद् [?० स्तत्]-पदबोध्यः पदान्तरोपस्थाप्ये तत्रा[? तस्या]-न्वयात् । 'आत्माऽत्मानं जानाती'त्यादौ तादृशनियमानुपपत्तेः । अतएव 'एकश्चैत्र एक पाककर्ते'त्यादिबोधजनकतया सुप्तिङेकवचनादेः पृथक् प्रयोजनमप्युपपद्यत इत्यवधेयम् । **अत[एव]** इति । इतरथा 'चैत्रः पाककर्ता, तण्डुलः पाककर्मे'त्यादिबोधस्य ततो दुर्वारत्वादिति भावः । **कर्तरि यक**[52] इति । कर्मणि शपादेरसाधुत्वात्[53] 'तण्डुलः पचत' इत्यादयो न प्रयोगा इत्यपि मन्तव्यम् ।। ४ ।।

---

49. Om. A. Reading here after M, commentary and Mathurānātha.
50. ० त्वाच्च M.
51. ० पन्नत्वं M.
52. See Pāṇini 3.1.67.
53. See Pāṇini 3.1.68.

अत्र वदन्ति—भावनाविशेष्ये संख्यान्वयः,[54] समानपदोपात्तत्वेनैकान्वयिकत्वस्यौचित्यात्[55]। भावनायाश्च विशेष्यतयान्वयो योग्यः[56] प्रथमान्तपदोपस्थाप्यः[57] कर्मत्वाद्यनवरुद्धः, तथैव साकाङ्क्षत्वात्[58]। 'चैत्रः पचति', 'पच्यत तण्डुल' इत्यादौ कर्तृकर्मणी प्रथमोपस्थाप्यतया भावनाविशेष्ये इति तत्रैव संख्यान्वयः।

'चैत्रेण सुप्यते', 'गगनेन स्थीयते' इत्यादौ प्रथमान्तपदाभावात् धात्वर्थस्य भावनाया विशेषणतयैवान्वयस्य व्युत्पन्नत्वात् भावनाया

भावनेति। धात्वर्थादिवारणाय **विशेष्य**इति। [59]विशेष्यत्वञ्च प्रतियोगि-[? ०गिते]तरसम्बन्धेन बोध्यम्, तेन 'न पचती'त्यादौ न नञर्थेन संख्यान्वय इति भावः। भावना चात्र यत्नो व्यापार आश्रयत्वादिश्च, तेन 'पचति-गच्छति-जानाती'त्यादीनां संग्रहः। **एकान्वयित्वस्ये**ति। एकविशेष्यत्वान्वयित्वस्यानुमितत्वादित्यर्थः। अनुमानप्रकारश्च आख्यातोपस्थापिता संख्या भावनाविशेष्यान्वयिनी, आख्यातोपस्थापकपदस्मारितत्वात्, भावनावदिति भावः[60]। ननु भावनाया एवान्वयनियम कुत इत्यत आह **भावनाया** इति। विशेषणतया धात्वर्थेऽन्वयादुक्तं—**विशेष्यतये**ति। धात्वर्थस्यापि कर्मत्वाद्यनवरुद्धत्वादुक्तं—**प्रथमान्ते**ति। प्रथमायाः कर्मत्वादौ शक्तिभ्रमादिना तदवरुद्धे प्रथमान्तपदोपस्थाप्यत्वेनान्वयादुक्तं **कर्मत्वाद्ये**ति। कर्मत्वाद्यविशेषणीभूतेत्यर्थः। 'पक्कं भुज्यते', 'तण्डुलस्य पाको भवती'त्यादौ पाककर्मत्वादिमति भावनाया अन्वयात्। [ननु] प्रथमान्तपदोपस्थाप्यस्य भावनाया विशेषणत्वेनैव कुतो नान्वय इत्यत आह—**तथैवे**ति। विशेष्यत्वेनैवेत्यर्थः। बोधस्येतिशेषः। **साकाङ्क्षे**ति। आकाङ्क्षायाः कार्यत्वादित्यर्थः।

नन्वेवं भावप्रत्ययस्थले भावनाविशेष्यविरहात् संख्यान्वयो न स्यादित्यत आह—**चैत्रेणे**ति। ननु भावनातिरिक्तस्थल एव प्रथमान्तपदापेक्षा, भावस्थले

---

54. संख्यया अन्वयः M. 55. उचितत्वात् A. 56. विशेष्यत्वेनान्वययोग्यः A. Reading here after M and commentary.

57. Om. A. Reading here after M, commentary and Rāmacandra. See TCM, p. 926. 58. A adds तथैवाकाङ्क्षितत्वात्, which is not supported by M, commentary, Mathurānātha or Rāmacandra.

59-60. Following a marginal insertion. A similar, but more elaborate comment in Mathurānātha. See TCM, pp. 924-25.

बाधितत्वाच्च भावनाविशेष्यविरहादनन्वितैव संख्या, एकवचनन्तु साधुत्वार्थम् । अतएव स्वापस्य द्वित्वबहुत्वेऽप्यौत्सर्गिकमेकवचनमेव । एवञ्च भावतिङामपि वर्तमानत्वेष्टसाधनत्वादिकमर्थः । तच्च धात्वर्थ एवान्वेति, तथैव प्रत्ययात् । तदबोधकानान्तु[61] घञादीनां[62] प्रयोगसाधुत्वमात्रम् ।

तु धात्वर्थ एव भावनाविशेष्यः, 'चैत्रेण सुप्यत' इत्यत्र 'चैत्रनिष्ठकृतिजन्यः स्वाप' इति प्रतीतेरन्यथाऽनुपपत्तेः । न च कर्मस्थल इवात्रापि आख्यातयोगे तृतीयायाः तिवर्थो मानाभावादित्यत आह—**धात्वर्थस्ये**ति । तथा चान्यथाऽनुपपत्त्या भावकर्मकृद्योग इव भावकर्मविहिताख्यातयोगे [fol. 6b ends] तृतीयाया एव कृतिरर्थ इति भावः । 'गगनेन स्थीयत' इत्यत्र प्रल्केति [? प्रकृति]-प्रत्ययानुरोधोऽपि नास्तीत्यभिप्रेत्याह—**भावनाया** इति । कृतेरित्यर्थः । [न च] आश्रितत्वस्य तृतीयाया एव लाभसम्भवादाख्यातयोगे तृतीयाया आश्रितत्वमपि नार्थः, कृतौ तद्योगे संसर्गमर्यादयैव 'गगनेन स्थीयत' इत्यादावाश्रितत्वं तिङर्थ एवास्त्विति वाच्यम्, उक्तव्युत्पत्तिविरोधात् । ननु भावनास्थले संख्यान्वयबलादेव व्युत्पत्त्यन्तरमास्थीयते, अन्यथा संख्यान्वयानुभवापलापापत्तेरित्यनुभवमेव द्रढ़यति—**अतऐवे**ति । संख्याया अनन्वयादेवेत्यर्थः । अन्यथा द्वित्वादिबोधार्थं द्विवचनादेरपि तत्र प्रसङ्गादिति भावः । ननु द्वित्वादेरन्वयबोधसम्भवेऽपि साधुत्वार्थमेकवचनमेव, अन्यथा तवाप्यप्रतीकारादित्यत उक्तम्—**औत्सर्गिक**मिति । साधुत्वमपि द्वित्वाद्यन्वयबोधसम्भवस्थल एवानुशिष्टमित्यर्थः । नन्वेवं भावप्रत्ययानां निरर्थकत्वापत्तिः, धात्वर्थविशेष्यकान्वयबोधस्यैवानुभवसिद्धत्वेन 'चैत्रनिष्ठा स्वापकृतिः', 'गगननिष्ठं स्थित्याधारत्वम्' इत्यादिबोधस्य सङ्क्रेतुमशक्यत्वादित्यत आह—**एवञ्चे**ति । **भावतिङामपी**ति । अपिकाराद्भावकृतः परिग्रहः । **वर्तमाने**ति । 'स्थीयते स्थितम्' इत्यादौ । **इष्टसाधनत्वे**ति । 'काश्यां स्थीयत स्थेयम्' इत्यादौ । **आदि**पदाद् बलवदनिष्टाजनकत्वसंग्रहः । ननु भावनाया इव तुल्यन्यायादेषामपि धात्वर्थो न विशेष्यः सम्भवतीति कथमेतेऽप्यर्था इत्यत आह—**तच्चे**ति । **तथैवे**तिं । क्वचिदप्येषां धात्वर्थविशेषणकानामप्रत्ययादित्यर्थ । तथा चात्र तुल्यन्यायत्वम[63]प्रामाणिक[64] [fol. 7a ends]-मिति भावः ।

---

61. तु om M. The commentary does not give any opinion.
62. तव्यघञा० M. The commentary does not give any opinion.
63-64. Following a marginal insertion.

भावनायाश्च कर्तर्याश्रयत्वेन'[65] कर्मणि पुनरन्यथाऽन्वयः, तव कर्तृ-कर्माभिधायित्ववत् अस्माकमपि तथाऽन्वयबोधकत्वम् । अतो 'मैत्रेण पचति तण्डुलः', 'तण्डुलं पच्यते मैत्र', पक्ष्यते मैत्रस्तण्डुल'[66] इत्यादयो न प्रयोगाः । भावना च व्यापारमात्रोपलक्षिता, अचेतनानुरोधात् । भिन्नाभ्यां रूपाभ्यामेकधर्मिबोधकत्वलक्षणं सामानाधिकरण्यमप्रसिद्धं सम्भवदन्यादृशं न वार्यते ।। ५ ।।

वक्ष्यमाणसम्बन्धभेदेनान्वयममभिप्रेत्य सम्बन्धभेदेनान्वयमाह **भावनाया** इति । [67]**कर्तरीति** । कर्तृविहिताख्यातस्थले । **आश्रयत्वेन** आश्रयतासम्बन्धेन । **अन्वय** इति । कृतेरन्वय इति परेणान्वय इति यावत् । ननु यदि भावनाविशेष एव संख्यान्वयस्तदाऽश्रयतया भावनाबाधितत्वेन तद्विशेष्यत्वाभाबात् कथं 'तण्डुलं पच्यत' इत्यादौ तण्डुलादिषु संख्यान्वय इत्यत आह—**कर्मणीति** । कर्मविहिता-ख्यातस्थल इत्यर्थः । **अन्यथेति**[68] । अन्यथा वक्ष्यमाणप्रकारेण । [69]ननु क्वचिदाश्रयतासम्बन्धेन कर्तरि क्वचिदन्यथासम्बन्धेन कर्मणीत्यत्रान्वये किं नियामकमत आह[70]—**तवेति** । यथा तवाख्यातमात्रस्य कर्तरि शक्तिः, कर्मणि चात्मनेपदस्य, तथा ममाख्यातमात्रस्य आश्रयतया, आत्मनेपदस्य चाऽन्यथाऽन्वय-बोधकत्वं, यथा तव तत्तद्धातूत्तरसार्वधातुकस्य शबादिसहकारेण कर्तुर्बोधकत्वं, यकः सहकारेण कर्मणो बोधकत्वं, तथा मम शबादिसहकारेणाश्रयतया, यकः सहकारेण चाऽन्यथाऽन्वयबोधकत्वं, यथा तवैकदा कर्तृकर्मणोरबोधकत्वं, तथा ममाश्रयतान्यथासंसर्गाभ्यामिति भावः । भावनापदार्थं निर्वक्ति—**भावना चेति** । **व्यापारेति** । सर्वाख्यातेत्यर्थः । तेनाश्रयत्वादिसंग्रहः, संख्याकालेष्टसाधन-त्वादिव्युदासश्च । आख्यातचैत्रादिपदयोरसति बाधके सामानाधिकरण्यान्वय-बोधात् कर्तृकर्मशक्तिं वारयितुमाह **भिन्नाभ्यामिति** । 'घटो घट' इत्यादावेक-धर्मस्मारकत्वेऽपि सामानाधिकरण्यव्यवहारादुक्तं भिन्नाभ्यामिति । इद [? इत्य]ञ्चाभेदेन परस्परार्थान्वियबोधकत्वं पर्यवसितार्थः, एवञ्च हेतौ 'भिन्नाभ्यामि'त्यस्यापि न वैयर्थ्यमित्यवधेयम् । ननु 'पचति' शब्द 'चैत्र' इति शब्दयोरस्तीभूतसमानवचनार्थकसामानाधिकरण्येन बाधकाभावविशेषितेन 'घटो द्रव्यम्' इत्यादिशब्दयोरिव एकधर्मिशक्ति[क]त्वसाधनदाख्यातचैत्रपदयोरेकधर्मि-

---

65. कर्तरि स्वाश्रयत्वेन A. Reading adopted here after M, which is suppported by the commentary. 66. मैत्रः पक्ष्यते A.

67-68. Following a marginal insertion.

69-70. Following a marginal insertion.

अथ 'तण्डुलं पचति मैत्र'[71] इत्यत्राश्रयतया[72] मैत्रो[73] भावनाविशेष्यः, 'मैत्रेण[74] पच्यते तण्डुल' इत्यत्र तण्डुलस्तु कथं, विषयतयेति चेत्, 'रथेन गम्यते ग्राम' इत्यादौ का गतिः।

अत्र प्राञ्चः—'मैत्रेण पच्यत तण्डुल' इत्यत्र मैत्रनिष्ठपाकभावनाविषयः मैत्रनिष्ठभावनाविषयपाकजन्यफलशाली वा तण्डुलः प्रतीयते इति साक्षात् परम्परया वा[75] भावनाविशेष्यस्तण्डुलः। 'रथेन गम्यत ग्राम' इत्यत्र तु[76] रथनिष्ठगमनानुकूलव्यापारजन्यफलशाली ग्रामः प्रतीयते इति व्यापारविशेष्यो ग्रामः ॥ ६ ॥

शक्तत्वं सिद्ध्यतीत्यत आह—**सम्भवदिति**। कृतिशक्त्याऽपि। **न वार्यते**। अप्रयोजकत्वेन व्याप्तेरभावादिति भावः। कृतावेव शक्तिर्न कर्तरीत्यत्र विनिगमकन्तु लाघवमेवेति भावः। शक्यतावच्छेदके शक्तेरनभ्युपगमे तु कर्तर्येव शक्तिः, कृतीनामनन्तत्वादित्यवधेयम् ॥ ५ ॥

अथेत्यादिना [fol. 7a ends] **कथमि**त्यन्तेन प्रश्नः। उत्तरं—**विषयते**ति। उत्तरं निराकरोति—**रथेने**ति। **का गति**रिति। तत्र संयोगाद्यात्मकस्य व्यापारस्य विषयित्वाभावादिति भावः।

मैत्रनिष्ठेति। [77]निष्ठता तृतीयार्थः, सा चाख्यातार्थान्वयिनी[78]। **विषय** इति। विषयत्वं संसर्गः, एवमन्यत्र। [79]नन्वत्रापि मैत्रनिष्ठभावनाविशेष्यत्वस्य तण्डुलत्वरूपेण यावत्तण्डुले सत्त्वात् पाकाकर्मण्यपि तण्डुले 'पच्यतेऽयं तण्डुल, इति प्रयोगः स्यात्,[80] तण्डुलादेः[च] फलवत्ताप्रतीतेरानुभविकत्वात् [अत] आह **मैत्रनिष्ठे**ति। अत्र मैत्रनिष्ठत्वस्य मैत्रस्य वा आख्यातार्थभावनायां, तस्या धात्वर्थे, तस्य फले [अन्वय] इत्यादिकं बोध्यम्। **साक्षादि**ति प्रथमं, **परम्परये**ति द्वितीयं बोधमधिकृत्य। **रथेने**ति। अथ रथनिष्ठत्वस्य रथस्य [वा] धात्वर्थे गमनेऽन्वयः, न त्वाख्यातार्थव्यापारे, **अन्यदीये**त्यादिना निरस्तप्रायत्वात्, तस्य चाख्यातार्थव्यापारे, तस्य च फल इत्यादिकं बोध्यम्। **व्यापारविशेष्य** इति। परम्परयेत्यादिः। अत्र 'रथनिष्ठगमनजन्यफलशाली ग्राम' इत्येव प्रतीतेरानुभविकत्वादयुक्तमिदमिति तु चिन्त्यम् ॥६॥

---

71. चैत्र A. Reading adopted here after M. 72. ० श्रयता M.
73. चैत्रो A. 74. चैत्रेण A. Reading adopted here after M, and in the light of the commentary A. 75. वा om. A.
76. तु om. A. 77-78. Following a marginal insertion.
79-80. Following a marginal insertion.

नव्यास्तु—भावनादेराख्यातलभ्यत्वात् आधेयत्वमात्रं तृतीयार्थोऽस्तु, संख्यामात्रं वा, सम्बन्धस्तु 'पचती'त्यादाविव वाक्यार्थः । अस्तु च फलकर्मणोरपि सम्बन्धस्तथा, फलन्तु कस्यार्थः । न च तदपि तथा, प्रकारीभूय भासमानत्वात् । फलावच्छिन्नक्रियाया धात्वर्थेऽपि क्रिया-जन्यफलालाभात्, विशेष्यविशेषणभावविपर्यासस्याशक्यत्वात्[81] । तस्मात् फलमात्मनेपदार्थः, इत्थञ्चाख्यातोपस्थापितभावनायाः[82] क्रियाविषयिन्या फलेऽन्वये फलस्य[83] क्रियाजन्यत्वं न लभ्येत, भावनाविशेषक्रियायाः[84] फलेऽन्वये तिङुपस्थापिताया भावनायाः[85] [86]क्रियाविशेषणत्वेनान्यत्र क्लृप्तान्वयो भज्येत[87] । तस्मात् कृत्यनभि-धायकभावकर्मकृद्योगे क्लृप्तशक्तेः सुपो लब्धया भावनया विशिष्टायाः क्रियायाः फलेऽन्वयः, सुवर्थकृतेर्विक्लृप्त्यां[88] विशेषणत्वेनैवान्वयस्य[89] व्युत्पन्नत्वात् । कर्तृकर्मवच्च कृतिफलयोरप्यभिधाने नियमान्नाति-प्रसङ्गः,[90] न वा 'पक्ष्यते तण्डुलो मैत्र' इत्यादयो प्रयोगाः । तिङु-पस्थाप्यायाः[91] संख्याया भावनाया इव प्रथमान्तपदोपस्थाप्यत्वेनै-वान्वयो व्युत्पन्नः ।

प्राचां मते दूषणपूर्वकं मतान्तरमाह **नव्यास्त्विवति** । **भावनादे**रिति । भावना यत्नः । आदिपदाद्व्यापारपरिग्रहः । **आधेयत्वमात्रमिति** । [92]इदन्त्वा-धेयत्वं तृतीयार्थः संसर्गमर्यादाबललभ्यो वेत्याशयेन[93] । न तु 'चैत्रेण पाक' इत्यादाविव कृत्यादिरपीति भावः । लाघवात् सम्बन्धस्य 'पचती'त्यादाविव संसर्गविधयैव भानस्यानुभवसिद्धत्वाच्च आह **संख्यामात्रं वेति** । 'चैत्रेण पच्यत' इत्यादावित्यादिः [?० वित्यर्थः] । **वाक्यार्थः** संसर्गमर्यादया लभ्यः । 'रथेन गम्यत' इत्यादौ पुनराधेयत्वमेव तृतीयार्थः, धात्वर्थनामार्थयोर्भेदेनान्वयस्याव्युत्-पन्नत्वादिति तु बोध्यम् । न च सम्बन्धस्य वाक्यार्थत्वे 'चैत्रः पच्यते तण्डुलः'

---

81. ० स्यावश्यकत्वात् A. Reading adopted here after M and commentary. 82. ० पिताया भाव० A. Reading adopted here after M and commentary. 83. कस्य M. 84. विषयस्य क्रिया० M. 85. भावनायां A. 86-87. क्रियाया विशेषणत्वेनान्यत्रान्वयः क्लृप्तो भज्येत A. 88. ०कृतेश्च M. 89. ० त्वेनान्वय० M.

90. नियामकतया नाति० M. 91. ० स्थापितायाः A, which is also supported by Mathurānātha and Rāmacandra ; cf. TCM, IV, p. 943. Reading adopted here after M and commentary. 92-93. Following a marginal insertion.

इत्यादावपि तथा स्यादिति वाच्यं, तादृशान्वयबोधे तृतीयायाः सहकारित्वात् । 'चैत्रं पच्यते तण्डुल' इत्यादौ द्वितीयाद्युपस्थाप्याधेयत्वान्वयबोधेन त्वयाप्याधेयत्वे तृतीयोपस्थाप्यत्वस्य नियामकस्य वक्तव्यत्वात् । **फलकमत्यपि** [?० **कर्मणोर-पीति**] । क्रियाफलयोश्चेति सूचयति । **तथा** वाक्यार्थः । **तदपि तथेति** । तथा च मैत्रनिष्ठपाकभावनायांस्तण्डुल इत्यादिरेव प्रत्ययः, भावनायाः कर्मणि स्वजन्यफलवत्त्वं स्वविषयक्रियाजन्यफलवत्त्वं वा सम्बन्ध इति भावः । ननु फलावच्छिन्नक्रियाया धात्वर्थत्वाद्धात्वर्थ एव फलमत आह **फले**ति । फलविशिष्टेत्यर्थः । वैशिष्ट्यञ्च जन्यजनकभावः । **अशक्यत्वादिति** । यद्रूपविशिष्टे वृत्तिग्रहस्तद्रूपविशिष्टस्यैव पदेन बोधनादिति भावः । **तस्मात् फलमि**ति । न च लाघवात् कृतौ शक्तिः, फले [च] लक्षणा, फलस्य संयोग-विभागादेः कृतिसमानत्वात् । ननु **प्राचीनै**रपि आत्मदेपदार्थः फलमुच्यत एव, न तु तन्मात्रं, भावनाया अपि तदर्थत्वादित्यत आह **इतथञ्चे**ति । अन्यथा फलस्यापदार्थत्वात् तत्रान्वयविचारोऽनुपपन्न एवेति भावः । 'चैत्रेण पक्वम्' इत्यादौ क्रियायाः सुपः उपस्थितभावनाविशेष्यत्वादुक्तम् **आख्यातोपस्थापिते**ति । **अन्यत्र** पचतीत्यादावित्यर्थः । **तस्मादि**ति । भावनायां तृतीयायाः शक्ति-कल्पनातः कर्माख्यातस्थले व्युत्पत्त्यनन्तरकल्पनमेव ज्यायः इत्यपाकर्तुमुक्तं क्लृप्तशक्तेरित्यन्ते [?० त्यनेन] । 'चैत्रेण पक्वं', चैत्रेण पक्व ओदन' इत्यादौ तृतीयायाः कृतौ शक्तिकल्पनादिति भावः । **फलेऽन्वय** इति । कर्माख्यातस्यापि भावनार्थ इति **प्राचां** मतमयुक्तमेवेति भावः । ननु कृतेः क्रियाविशेष्यत्वमेवेति सामान्यत एव व्युत्पत्तेः कथमेतदित्यत आह **सुवर्थे**ति । **व्युत्पन्नत्वादि**ति । 'मैत्रेण पक्वमि'त्यादाविति शेषः । तथा च तिङर्थकृतेरेव तथात्वमिति भावः । **नियमादि**ति । शवादेः सहकारेणैव कृतेः, यकः सहकारेणैव फलस्य सार्वधातु-केनाभिधानम्, एकदा कृतिफलयोरभिधानञ्च नाख्यातमात्रेणेति नियमादित्यर्थः । [fol. 8b ends] **अतिप्रसङ्गः** । 'चैत्रः पच्यत' इत्यादौ कृतेः, 'तण्डुलः पच्यत [? पचति]' इत्यादौ फलस्य प्रत्ययप्रसङ्ग इत्यर्थः । ननु कर्माख्यातस्य भावनार्थकत्वाभावेन तव संख्यान्वयो न स्यात्, भावनान्वयिनैव संख्यान्वयादित्यत आह **तिङुपस्थाप्याया** इति । वस्तुतो 'देवदत्तो यज्ञदत्तः गच्छतः', 'चैत्रो दण्डी मैत्रो कुण्डली' इत्यादौ द्वित्वान्वयवत्तया गृहीतयोरपि चैत्रमैत्रयोर्द्वित्वान्वया-प्रत्ययेन भावनान्वयिनैव संख्यान्वयः । भावना च फलस्याप्युपलक्षिका लकारा-देश एकैकवचनाद्यर्थस्यैवोपलक्षणा [?० क्षणे]-त्यवधेयम् । **प्रथमान्तेति** । समान-वचनप्रथमान्तेत्यर्थ । नातो 'नराः पचेत' इत्यादावन्वयः, साम्यञ्च एकवचन-त्वस्य एकैकवचनान्तरसमभिव्याहृतैकवचनत्वाभावविशिष्ट[यद्]द्विवचनान्यत्वं

'चैत्रो गन्ता गतो ग्रामो मित्रा पक्त्री गतं पुरम् ।
भोक्ता तृप्यति पक्वानि भुङ्क्ते पक्ताऽपसार्यताम् ।।'——इत्यत्र सामानाधिकरण्याद्यन्यथाऽनुपपत्त्या कर्तृकर्मणी कृद्वाच्ये[94] । 'मैत्रस्य[95] नप्ता चैत्रादन्यो घटात् पृथक् परोऽपरो वेत्यादाविव पदार्थतावच्छेदकेनैव कृत्यादिना धात्वर्थेऽन्वयः, तथैव साकाङ्क्षत्वात् । अस्तु वा कृत्यादिघटित एव कर्त्रादिना सममन्वयः । मुख्यभाक्त-साधारणस्य फलादिलक्षणकर्मत्वस्य कृत्यादिलक्षणकर्तृत्वस्य चानभि-धाने द्वितीयादयः । कृता विशिष्टाभिधाने विशेषणस्याप्यभि-धानात् ।।७।।

तदभावस्य, एकवचनान्तरद्वयसमभिव्याहृतैकवचनत्वाभावेन एकवचनद्विवचनयोः परस्परसमभिव्याहाराभावेन विशिष्टं यद्बहुवचनान्यत्वं तदभावस्य चान्यतमेन [?० तरेण] रूपेण, 'चैत्रो मैत्रश्च गच्छत' इत्याद्यनुरोधात् । यद् वा—एकवचनान्तरोपस्थाप्यस्य भावनादेः प्रथमाया एकवचनोपस्थाप्ये द्विवचनोपस्थाप्ये क्वचिदेकवचनान्तद्वयोपस्थाप्ये [अन्ययः], एवमन्यत्रापि, शब्दैक्यस्यानुपादेय-त्वात् ।

नन्वेवं कर्तृकर्मणी कृतोऽपि वाच्ये न स्याताम्, तत्रापि लाघवेन कृतिफलयोरेव शक्तेरुचितत्वादित्यत आह—**चैत्रो गन्ते**ति । अत्र सामानाधिकरण्यं नैकधर्मि-बोधकत्वं, तस्यासिद्धेर्वक्तुमशक्यत्वात्, किन्तु समानलिङ्गत्वादिरूपाकाङ्क्षा-वत्त्वम्, अभेदान्वय एव तस्य तन्त्रत्वादित्यभिप्रेत्य पुंस्त्रीनपुंसकोपन्यासः । ननु लाघवेन कृतः कृतिफलयोः शक्तौ व्युत्पत्तिवैचित्र्यादेव तत्र भेदान्वयबोधेऽपि समानलिङ्गत्वादेरुपयोगो भविष्यतीत्यत आह—**भोक्ते**ति । अत्र कृतौ तृप्त्या-श्रयत्वस्य, भोजने [fol. 9a ends] पाकफलविक्लित्तिकर्मकत्वस्य बोधादिति भावः । अत्र कर्त्रादौ निरूढलक्षणाभ्युपगमात् कृत्यादावेव कृतोऽपि शक्तिरिति तु चिन्त्यम् । **सामानाधिकरण्यादी**त्यादिपदात् भोजनकृत्यादौ तृप्त्याश्रयत्वादि-बोधपरिग्रहः । **कर्तृकर्मे**ति । कृजादेः [? तृजादेः] कर्ता तव्यादेः कर्मकत्वा-देरुभयं वाच्यमिति भावः । 'स्नानीयं चूर्णं', 'दानीयो ब्राह्मणः', 'आसित-मिदमासनम्' इत्यादौ करणसम्प्रदानाधिकरणादिकन्तु कृतो लक्ष्यमेवेति हृदय-मिति वदन्ति ।

न [? ननु] कर्त्रादेः कृदर्थत्वे कृत्यादेरेकदेशे धात्वर्थान्वयो न स्यादित्यत

---

94. M ends here. 95. मैत्रस्य in commentary.

यत्तु—धातूत्तरप्रत्ययत्वेनैव कृतौ शक्तिः, पाचकादिपदे तु सामानाधिकरण्यानुरोधात् कृतिविशिष्टे लक्षणा। तन्न, भावकृतोऽपि कृतिवाचकतापत्तेः, धातुत्वाविघटितत्वात्,[96] तस्मादाख्यातस्यैव लघुत्वाच्च ॥८॥

आह—**मैत्रस्येति**। अत्र जन्यशरीरजन्यशरीरे नप्तृपदार्थेन षष्ठ्यर्थान्वयः। षष्ठ्यर्थो[97] हि सम्बन्धो जन्यत्वं प्रयोज्यत्वं वा? नाद्यः, बाधात्, नान्त्यः, चैत्रपुत्रे तत्प्रपौत्रादौ च तथा प्रयोगप्रसङ्गात्, किन्तु षष्ठ्यर्थस्य निरूपितत्वस्य प्रथमजन्यतायां [?] इति भावः। ननु प्रयोज्यत्वविशेष एवेह षष्ठ्यर्थ इत्यनतिप्रसङ्गात् पदार्थ एव तदन्वयः, शरीरमात्रमेवेह नप्तृपदस्यार्थः, जन्यशरीरजन्यत्वञ्च सम्बन्धत्वेन षष्ठ्या, जन्यत्वशरीरजन्यत्वानां वा षष्ठ्यर्थानां परस्परमन्वयाद्विशिष्टलाभः, केवलनप्तृपदे च विशिष्टे [?० शिष्ट]-शक्तिर्निरूढ़लक्षणा वा, एतेन पित्रादिपदमपि व्याख्यातमित्यनुधावने तु नानुपपत्तिगन्धोऽपीत्तत आह—**चैत्रादन्य** इति। अत्र पदार्थतावच्छेदकेऽन्यत्वादेरेव पञ्चम्यर्थस्यानुयोगित्वस्यावधिमत्त्वस्य चान्वयः, न त्वन्यादौ, वाधादिति भावः। **तथैवेति**। अन्यत्र निराकाङ्क्षत्वेऽपि तत्रानुभववलेन साकाङ्क्षत्वादिति भावः। 'मैत्रादन्य' इत्यादौ स्वाश्रयाश्रयत्वपरम्परासम्बन्धेन पदार्थ एव पञ्चम्यर्थान्वय [fol. 9b ends] इत्यनुभवविरुद्धमेव **कश्चिद्** ब्रूयात्तदा प्रकृतेऽपि तथैवास्त्वित्यभिप्रेत्याह—**अस्तु वेति**। [98]यद्वा—तथाकाङ्क्षाया यौक्तिकत्वेन...† **चो**ऽनुचित इति सर्वत्रैकदेशान्वयो नेत्याह—**अस्तु वेति**।[99] **प्राचामाख्यातेन** कर्मादिगतसंख्यायाः कृता कर्मादेरनभिधाने द्वितीयादिकमिति [?] कल्पना द्वयी, मम तु कृदाख्यातः [?० ख्यातयोः] साधारण्येन एकैव कल्पनेत्यत आह—**मुख्येति**। **फलादीति**। **आदि**पदाद् 'घटो ज्ञायत' इत्यादौ विषयत्वलक्षणभाक्तकर्मत्वपरिग्रहः। **कृत्यादी**त्यादिपदात् 'चैत्रो जानाती'त्यादावाश्रयत्वलक्षणकर्तृत्वपरिग्रहः। **द्वितीयादय** इत्यादिपदात् तृतीयायाः कृद्योगे षष्ठ्याः [च] परिग्रहः। 'ग्रामोगतश्चैत्रो गतश्चैत्रो भवने चैत्रो गन्ते'त्यादौ द्वितीयाद्यभावमुपपादयति **कृतेति**। कर्मत्वादिविशिष्टस्याभिधाने कर्मत्वादेरप्यभिधानादित्यर्थः ॥७॥

प्रत्ययत्वेनैव कृतिवाचकत्वं, प्रत्यय[त्व]स्य लाघवात्, यत्र च साभानाधिकरण्यं तत्र लक्षणयैव निष्पत्तिरित्युपन्यस्य दूषयति—**यत्त्विति**। द्वितीयादि-

96. ० घटितात् A. 97. षष्ठ्यर्थं in manuscript, corrected to षष्ठ्यर्थो in a different handwriting.

† Faint. 98-99. Following a marginal insertion.

यदपि—कर्तृकृतोऽपि कृतौ शक्तिः, कृतिविशिष्टे तु लक्षणैवेति, तदप्यसत्, यतो विनाऽवच्छेदकरूपं शक्यत्वासम्भवात् । गोत्वत्वादिना शक्तौ चातिगौरवादस्तु गवादिपदानां गोत्वविशिष्टं शक्यम्, विशिष्टान्तराणान्तु शक्यत्वं विलीयेत, केवले च विशेषणे स्वारसिकप्रयोगविरहस्तुल्य इहापि[100] ।।६।।

वारणाय धातूत्तरेति । नन्वेवं 'पाचको भुङ्क्ते' इत्यादौ पाककर्त्तुर्न बोध इत्यत आह—**पाचकादीति** । **लक्षणेति** । एवञ्च कृतः शक्तिकल्पनं, शक्यसम्बन्धस्य लक्षणाया सम्पादनार्थमिति भावः । **भावकृतोऽपीति** । घञादेरपीत्यर्थः । तथा तस्य निरर्थकत्वप्रवादव्याघात इति भावः । ननु भवतां भावाख्यातकृत्प्रत्ययादेः[101] कृतिवाचकत्वेऽपि घञा नार्थप्रत्ययो निराकाङ्क्षत्वात्, निविश्य[? ०वि शे०]ताम्वा घञादिभिन्नत्वम्, वस्तुतस्तावदन्यान्यत्वरूपप्रत्ययशरीरे घञाद्यनन्तर्भावादेव नानुपपत्तिः, 'प्रतीयते येनार्थः स प्रत्यय इति व्युत्पत्तिसिद्धस्य प्रत्ययस्यैवोपादानादित्यत आह—**धातुत्वादीति** । धातुत्वं' हि तावदन्यतमत्वादिरूपमिति भावः । ननु धातूत्तरत्वं प्रत्ययविशेषपरिचायकम्, नत्ववच्छेदकम्, तावदन्यत्वरूपप्रत्ययत्वे सुबाद्यनन्तर्भावादेवानतिप्रसङ्गादित्यत आह[102]—**आदीति** । **आदिपदात्** प्रत्ययत्वपरिग्रहः । प्रत्ययत्वं हि तावदन्यान्यत्वं बुद्धिविशेषविषयत्वम्वा [fol. 10a ends] घटकीभूतभेदानां विशेष्यविशेषणभावभेदेन बुद्धीनामनन्तत्वाच्च नाना, गुरुतरञ्चेति, ततस्तिप्त्वादिरूपमाख्यातत्वमेव लघुतरमिति भावः ।।८।।

कर्तृकृतोऽपीति । विशिष्य तृच्त्वादिनेति शेषः । **कृताविति** । लाघवादिति भावः । **यतो विनेति** । **विनाऽवच्छेदक [रूप]** मित्यादौ [? ० त्यादिः] । वस्तु[तः] गोत्वादिविशिष्टं शक्यम् । विशिष्टान्तराणां गुरुत्वादिविशिष्टान्तराणां गुरुप्रभृतिपदशक्यत्वं विलीयेत इत्यर्थः । तत्रापि गुरुत्वत्वादिना गुरुत्वादौ शक्तिः गुरुत्वविशिष्टे तु लक्षणेत्यस्य वक्तुं शक्यत्वादिति भावः । वस्तुतः, शक्त्या बोधस्यानङ्गीकारेऽवच्छेदकं विना शक्तेरुपगमेऽपि क्षतिविरहाद्विशिष्टमात्रस्यैव शक्यत्वं विलीयेत, गवादिपदानां केवले गोत्वादौ गुर्वादिपदानां केवले गुरुत्वादौ शक्तिर्गोत्वादिना गुरुत्वादिना च विशिष्टे लक्षणेत्यस्यापि सुवचत्वादिति तु ज्यायः । अथ यत्र यत्पदस्य शक्त्या प्रयोगः, 'इदमेतत्पद-

100. एवेति A. Reading here after the commentary.
101. ० कृत्० inserted according to a faint marginal insertion.
102. MS adds a superfluous आह.

एवञ्च—'गतो ग्रामो गम्यत' इत्यादौ फलस्य कृदात्मनेपदाभ्यामेव लाभात् लाघवाद्धातोरनन्यलभ्यव्यापारविशेषमात्रवाचकत्वस्थितौ 'ग्रामं गच्छति', 'ग्रामस्य गन्ते'त्यादौ द्वितीयादेः फलजनकत्वलक्षणं कर्मत्वमर्थः, फले च प्रातिपदिकार्थोऽधिकरणत्वेनान्वेति,[103] फलमात्रं वाऽर्थः जनकत्वन्तु संसर्गमर्यादया लभ्यमित्यपि कश्चित्[104] ।

शक्यमिति' प्रामाणिकप्रयोगो वा तत्रैव तत्पदशक्तिः, केवले च विशेषणे तदभावान्न तत्र शक्तिरित्यत आह—**केवले चेति** । स्वारसिकप्रयोगः शक्त्या प्रयोगः, इदमेतत्पदशक्यमिति प्रामाणिकव्यवहारो वा । **तुल्य** इति । **इहापी**ति । कृतः कृतौ शक्त्या प्रयोगस्य, 'कृतिस्तृजादिशक्या' इति प्रामाणिकप्रयोगस्य च विरहादिति भावः । 'चैत्रः पक्ते'त्यादौ केवले विशेषणे प्रयोगस्योपपादितत्वादाख्यातवत् प्रामाणिकतया प्रयोगविरहस्य चानिर्णयात् । अयुक्तमिदमिति तु चिन्त्यम् ।।६।।

एवञ्चेत्यादि **कश्चिद**ित्यन्त एको ग्रन्थः । **एवञ्च** फलस्य शक्यत्वे च । **धातो**रित्यादि । **व्यापारविशेष** पाकादिक्रियारूपः । धातोः फलावच्छिन्नव्यापारवाचित्वे तत एव फललाभसम्भवेन द्वितीयादेः [fol. 10b ends] फलमर्थो न सिद्ध्यतीति तद्व्यवच्छेदाय **मात्र**पदम् । **द्वितीयादे**रित्यादिपदात् षष्ठीपरिग्रहः । **अर्थ** इति । इतरथा तत्प्रतीतेरनुपपत्तेरिति भावः । ग्रामादेः फलाधारताप्रत्ययादाधारतानिरूपकफलजनकत्वमर्थः **कश्चिदाह**, तन्निराकरणायाह **फले चे**ति । एकदेशान्वयाल्लाघवाच्चाह **फलमात्रे**ति [? ० **मात्रमि**ति] । नन्वेवं [105]फलमात्रस्य षष्ठीद्वितीययोरर्थत्वे 'पाको न तेमनस्य' [इति] व्यवहारानुपपत्तिस्तत्सम्बन्धस्य† वृत्त्यनियामकत्वात्, तस्य प्रतियोगितावच्छेदकत्वे तेमनीयपाके†† 'न तेमनस्ये'ति व्यवहारः स्यात्[106]... ...[107] यत्र कर्मणा संयोगो न जनितस्तत्रापि 'न गच्छती'ति प्रयोगानुपपत्तेश्च,

---

103. ० करणेनान्वेति A. Reading adopted in the light of the commentary.
104. केचित् A, which is also supported by Mathurānātha and Rāmacandra. See TCM IV, p. 964. Reading here after commentary. 105-106. Following a marginal insertion.
107. Too faint to be deciphered.

† तत्सम्बन्ध = जनकत्वसम्बन्ध

†† तेमन—A kind of sauce.

तदसत्, 'ग्रामं गच्छति त्यजती'त्यादौ द्वितीयादितः फलसामान्यलाभेऽपि नियत-संयोगविभागाद्यलाभेन फलविशेषावच्छिन्नव्यापारस्यैव धात्वर्थ-त्वात्, इतरथा त्यजि-गमिप्रभृतीनां पर्यायत्वापत्तेः ।।१०।।

तवापि 'गम्यत ग्राम' इत्यादौ ग्रामादेः संयोगादिफलशालित्वं कुतो नियमतः[108] प्रतीयत इति चेत्, तदवच्छिन्नव्यापारवाचिधातुसमभि-व्याहारादेव, यथेष्टसाधनतावाचकत्वाद्विधेरेव स्वर्गकामादिपदसमभि-व्याहारात् स्वर्गादिजनकत्वम् । प्रतीतिस्त्विष्टफलयोरिष्टत्व-फलत्वाभ्यां[109] स्वर्गत्वसंयोगत्वाभ्यां वेत्यन्यदेतत् ।।११।।

तत्र तत्कर्मकगमनस्याप्रसिद्ध्या गमनत्वावच्छेदेन द्वितीयार्थस्य तन्निष्ठसंयोग-जनकत्वस्यैव प्रतिषेधात्, न तु जनकत्वसम्बन्धेन, तन्निष्ठसंयोगस्य जनकत्वादेः सम्बन्धस्य प्रतियोगितानवच्छेदकत्वात्, [110]तस्य प्रतियोगितावच्छेदकत्वे गमनकर्मण्यपि देशे 'न गच्छती'ति[111]......[112] [प्रयोगापत्तेश्च] । तस्मात् फलजनकत्वं फलं जनकत्वं[113] वा द्वितीयादेरर्थः, एवमाधेयत्वमपि, इतरथा 'रूपं न गच्छती'ति प्रयोगानुपपत्तेः, तत्र संयोगाप्रसिद्धेः, तत्र संयोगावच्छेदेन रूपाधेयत्वस्यैव प्रतिषेधात् । [114]'रूपं न गच्छति रस' इत्यादौ च 'रूपं न पश्यत्यन्ध' इत्यादाविव नञर्थस्य वारद्वयमन्वयः[115] । मैवम्, लाघवात् संयोगाद्यात्मकफलशक्तद्वितीयादेरुदाहृतस्थले जनकत्वादौ लक्षणाऽभ्युपगमात् । संयोग-[विभागा]-द्यलाभादिति । 'गच्छती'त्यादौ संयोगस्य, 'त्यजती'त्यादौ विभागस्यालाभादित्यर्थः । **धात्वर्थत्वात्** गमित्याद्यर्थत्वात् । ननु द्वितीयादेः संयोगत्वादिनैव फलमर्थः इति न फलविशेषलाभ इत्यत आह **इतरथेति** । फलस्य धात्वर्थतानवच्छेदकत्व इत्यर्थः । **पर्यायतेति** । एकस्या एव क्रियायाः पूर्वदेशत्यागोत्तरदेशगमनरूपत्वेन शक्यतावच्छेदकस्याभेदादिति भावः । न च पर्यायत्वमिष्यत एव, कर्मसमभिव्याहृतगमनादौ फलबोधे तु तत्तत्फलावच्छिन्न-क्रियायां निरूढलक्षणेति वाच्यं, [fol. 11a ends] 'ग्रामं त्यजती'त्यत्र 'ग्रामं गच्छती'ति प्रयोगापत्तेः ।।१०।।

शङ्कते—**तवापीति** । **संयोगादीति** । **नियमत** इयादि । आत्मनेपदस्य फलत्वेन शक्तौ संयोगत्वादिना प्रतीत्यनुपपत्तिः, संयोगत्वादिना शक्तावपि 'ग्रामस्तज्यत'

108. Om. A. Added after commentary.

109. ० रिष्टफलत्वाभ्यां A. Reading after the commentary.

110-111. Following a marginal insertion. 112. Too faint to be deciphered. 113. MS adds a superfluous च.

114-115. Following a marginal insertion.

अस्तु वा बुद्धिविषयतावाचकतदादेरिव व्युत्पत्तिवशादेव प्रकृत्यर्थ-तावच्छेदकफलतच्छालिवाचकाख्यातकृतोरपि विशेषरूपेण बोध-कत्वम् ।।१२।।

इत्यत्रापि 'ग्रामो गम्यत' इति स्यात्, विभागत्वेन विभागस्यात्मनेपदार्थत्वादिति भावः। **तदवच्छिन्नेति**। संयोगाद्यवच्छिन्नेत्यर्थः, तथैव साकाङ्क्षत्वादिति भावः। **जनकत्वमिति**। **प्रतीयत** इत्यनुषज्यते। ननु तथापि फलत्वेन शक्तौ स्वर्गत्वादिनाऽनुपपत्तिः, स्वर्गत्वादिना च शक्तौ शक्त्यानन्त्यम्। अथ तत्र सामान्यत एव बोधः, विशेषतो बोधे तु शक्त्यानन्त्यं न दोषाय, प्रमानेक [? प्रामाणिक]-त्वात्, तदा तुल्यमिहापीत्यभिप्रायवानाह—**प्रतीते [? ०तीति] स्त्विति** ।।११।।

समभिव्याहारनियामकापेक्षया लघुप्रकारमाह—**अस्तु वेति**। यथा वस्तुतो बुद्धिविषयीभूतं यद्घटत्वादिविशिष्टं तद्वाचकस्य तदादेर्ज्ञानकरणतावशादेव वस्तुतो यत्तद्विषयीभूतं घटत्वादि तेनैव रूपेण बोधकत्वं तथा वस्तुतः प्रकृत्यर्थतावच्छेदकं यत् संयोगादि तेनैव बोधकत्वमित्यर्थः। बुद्धि-विषयादिकन्तु शक्तिज्ञाननिष्ठकारणतावच्छेदकेऽन्तर्भूतं पदार्थोपस्थितिरूपे संसर्गे सामानाधिकरण्येन विशिष्टम्वेत्यन्यदेतत्। एतेन [fol. 11b ends] यदाकदाचिद्बुद्धिविषयत्वसत्त्वेनैव कारणतानिर्वाहात् स्वप्रकृत्यर्थतावच्छेदकस्य च सत्त्वाननुगमेनाननुगमादयुक्तमिति निरस्तम् [?]। यत्तु—यथा तदादिपदानां घटत्वादिना बोधकानामपि बुद्धिविषयत्वेनैव शक्तिर्न घटत्वादिना, शक्त्यानन्त्यप्रसङ्गादिति भाव इति, तन्न, तेन रूपेण शक्तिग्रहस्य हेतुतायाऽन्वयव्यतिरेकाभ्यामवधारितायाः परित्यागायोगात्। अन्यथा तदादिपदे शक्तेरपि विलयापत्तिः, बुद्धिविशेषसहकारित्वेनैवानति-प्रसङ्गात् बुद्धौ शक्यतावच्छेदकनिविष्टत्व-[? ०विष्ट]विशेषणस्य गौरवे मानाभावेन चाप्रयोजकत्वात् सत्यामपि बुद्धौ तद्विशेष्यशक्याभावग्रहदशायामिव तत्प्रकारेण शक्त्यभावग्रहदशायामपि अन्वयानुभवाभावस्य तुल्यत्वात्, कथम्वा इच्छादिविषयित्वं विषयत्वभेदवत्त्वादिनाऽपि प्रकृते च फलवत्त्वादिनाऽपि न शक्तिः, सहकारिबुद्धौ शक्यतावच्छेदकनिविष्टविशेषणस्याप्रयोजकतया निवारित-त्वात्; इष्टापत्तौ वा कथं न ग्रहाननुगमः कथम्वा घटत्वादिनाऽपि [?] शक्तेः सहकारित्वे क्षत्यभावात्। किञ्चैवमप्यवच्छेदकानुसरणमप्ययुक्तं [fol. 12a ends] निरवच्छिन्नाया एव शक्तेः स्वीकर्तुमुचितत्वात्, प्रकृतित्वस्य एकस्या-भावात् तत्तदन्तर्भावेन प्रकृतेः शक्तिकल्पना चात्यन्तायुक्ता, तस्मात्तदादेरपि

अपि च धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वं, न तु धात्वर्थजन्यफल-शालितामात्रं, गमिपत्योः[116] कर्मत्वस्य पूर्वस्मिन् देशे, त्यजेश्चोत्तर-स्मिन् देशे, स्पन्देः पूर्वापरदेशयोः प्रसङ्गात् ।।१३।।

घटत्वादिकमेव शक्यतावच्छेदकं तदनुगमकं तद्ग्रहानुगमकं वा । बुद्धिविषयत्व-मित्यपि मतमयुक्तं, शुद्धघटादिविशिष्टशाब्दबोधे शुद्धघटत्वादिविशिष्टशक्ति-ग्रहस्य हेतुताया अतिप्रसङ्गभङ्गायान्यत्रक्लृप्तायाः परित्यागायोगादित्यादेरिति संक्षेपः ।।१२।।

ननु त्यजिगम्योरेकार्थत्वेऽपि 'ग्रामं गच्छती'त्यादौ 'ग्रामं त्यजती'त्यादिको न व्यवहारः, द्वितीयादेः कर्माख्यातादेश्च गम्यादिसमभिव्याहारेण संयोगस्य, त्यजिसमभि-[व्या]-हारेण विभागस्य बोधकताया व्युत्पत्तिसिद्धत्वादत आह **अपि चेति** । तथा च ग्रामादेर्गम्यादिकर्मत्वव्यवहारानुपपत्त्या फलावच्छिन्न-क्रियैव गम्याद्यर्थ इति भावः । ननु धात्वर्थजन्यफलशालित्वमेव कर्मत्वमिति न तदनुपपत्तिरित्यत आह **न त्विति** । **पूर्वस्मिन्निति** । विभागात्मकफल-वत्त्वादिति भावः । **तदु-[? त्यजेश्चो]-त्तरस्मिन्निति** । संयोगात्मकफलवत्त्वा-दिति भावः । **पूर्वापरयोरिति** । विभागसंयोगात्मकफलवत्त्वादिति भावः । **प्रसङ्गादिति** । **अस्मन्मते** तु गमेः संयोगेन त्यजि-[? त्यजे]-र्विभागेनावच्छिन्ने स्पन्दिपत्योर्निरवच्छिन्न एव कर्मणि शक्तिरिति नातिप्रसङ्ग इति भावः । अत एवैतन्मते **गमिपत्योश्चेति** पाठः प्रामादिकः । एवं वृध्धातोरवयवो-पचयरूपार्थकत्वे तु जलतीरसंयोगात्मकतीरप्राप्तिफलस्य तीरवृत्तित्वात् तत्रापि 'नदीतीरं वर्द्धत' इति प्रयोगापत्तिर्बोध्या । न चैवं वदता 'भूमिं पतति खग' इत्यादौ पत्धातोरेव...[117] [? ० धातोः संयो०]-गावच्छिन्नक्रियैवार्थस्त-ज्जन्यविभागवत्त्वस्य वृक्षे सत्त्वात् 'वृक्षं पतती'ति स्यात्, पत्धातोरकर्म-कत्वेन तथा न प्रयोग इत्यपि न ; 'नभ उत्पतति', 'नरकपतित' इत्यत्र द्वितीयातत्पुरुषानुशासनान्न कर्मत्वमस्त्येव—इति वाच्यम्, तथा सति 'पर्णं पतती'त्यादिप्रयोगात् सर्वत्र तद्योगे कर्मत्वासत्त्वादेवेति हृदयम् ।।१३।।

---

116. Reading here after A, which is supported by Mathuranātha, cf. TCM, IV, p. 972. Rāmabhadra regards it as erroneous, but his positive opinion cannot be ascertained from the commentary (could it be स्पन्दिपत्योः ?)

117. Too faint to be deciphered.

फलावच्छिन्नव्यापारबोधकत्वादेव च धातूनां सकर्मकत्वव्यवहारः, भाक्तस्तु जानात्यादेः, तादृश[धातु][118]-प्रयोग एव च कर्मप्रत्ययाः। तत्र च द्वितीययाऽधेयत्वमभिधीयते, तच्चाकाङ्क्षावैचित्र्याद् धात्वर्थतावच्छेदकफलेऽन्वेति, अत एव चास्याः पदार्थान्विताधेयत्वबोधिकायाः सप्तम्या भेदः ॥ १४ ॥

अस्तु वा कर्माख्यातस्येव द्वितीयाया अपि फलमर्थः । स्तां[119] वा फलव्यापारौ पृथगेव धात्वर्थौ, विशिष्टस्त्वन्वयबललभ्यः । 'भूमिं प्रयाति विहगो विजहाति महीरुहं न तु स्वात्मानम्' इत्याद्यनुरोधात् क्रियान्वयिपरसमवेतत्वमपि कर्मप्रत्ययार्थः ॥ १५ ॥

ननु कर्मपदं तत्तद्धातुसमभिव्याहारादेव फलत्वेन तत्तत्फलसाकाङ्क्षमिति नेते दोषा इत्यत आह—**फलावच्छिन्न** इति । अवच्छिन्नान्तात् स्पन्दिपदि-[?० पति०]-व्युदासः । नन्वेव 'जानाती'त्यादौ सकर्मकत्वव्यवहारो न स्यात्, तस्य ज्ञानादिमात्रबोधकत्वादित्यत आह—**भाक्तस्त्व**ति । ननु यादृशधातुयोगे कर्मप्रत्ययो. . .[120]-[ऽनु०]-शिष्यते तादृशत्वमेव सकर्मकत्वमित्यत्र आह—**तादृशे**ति । उक्तसकर्मकभाक्तसकर्मकधातुयोग एवेत्यर्थः । अत्र चाधेयत्वस्याखण्डत्वे [fol. 12b ends] आधेयत्वे शक्तिरितरथा निरूढलक्षणा, लाघवादेकत्वादावेव शक्तिरित्यवधेयम् । नन्वेकदेशे फले कथं तदन्वय इत्यत आह—**तच्चे**ति । नन्वेवं 'ग्रामे त्यजती'त्याद्यपि स्यात्, आधेयत्वबोधकताया द्वितीयासप्तम्योरविशेषादत आह—**अतएवे**ति । **अस्या** द्वितीयाया । सप्तम्यर्थ आधेयत्वं पदार्थ एवान्वेति, द्वितीयार्थस्तु पदार्थतावच्छेदक एवेति नाविशेष इति भावः ॥ १४ ॥

एकदेशान्वयविद्वेष्टारं प्रत्याह—**अस्तु वे**ति । इत्थञ्च 'ग्रामं गच्छती'त्यादौ ग्रामनिष्ठसंयोगजनकसंयोगजनकक्रियेत्यादिको बोधः 'दण्डवान् रक्तदण्डवान्' इतिवत् समर्थनीयः । धातोः फलव्यापारयोः सम्बन्धे शक्ति [? शक्त्य०]-कल्पनेऽपि [?० नेन] लाघवमभिप्रेत्याह **स्ताम्वे**ति—इति **सम्प्रदायः** ।

नव्यास्तु—ननु द्वितीयासाकाङ्क्षत्वेनैव धातूनां सकर्मकत्वव्यवहारः, तच्च फलबलात् कुत्रचिदर्थे कस्यचिदेव धातोरिति नैतदेत [? नैत०] दनुरोधेनापि

118. ० धातु० not in A. Added here in the light of the commentary. 119. स्यात्, A, which is also supported by Mathurānātha, cf. TCM IV, p. 977. 120. Too faint to be deciphered.

इयांस्तु विशेषो—परत्वं[121] सुपा प्रकृत्यर्थाद्यपेक्षिकं तिङादिना च स्वार्थफलाश्रयापेक्षिकं प्रत्याय्यते ।। १६ ।।

फलस्य धात्वर्थतावच्छेदकत्वमिति द्वितीयादेरेव फलमर्थः । त च द्वितीयादेः शक्त्यन्तरकल्पनातो लाघवेन क्लृप्तधातुशक्तेरवच्छेदकत्वमेव फलस्य ज्यायः, फलव्यापारयोः सम्बन्धेऽपि जनकत्वाख्ये शक्तेर्वक्तव्यत्वेन तत्रैव गौरवात्, किञ्चैवमपि धातोर्व्यापार एव शक्तिः, 'गम्यत' इत्यादावेव मुख्यः प्रयोगः, 'ग्रामं गच्छती'त्यादौ च संयोगावच्छिन्नव्यापारे लक्षणा—इत्येव स्यात् । स्यादेवेति चेत्, तर्हि द्वितीयाया एव फले शक्तिर्धातोश्च व्यापारे ; 'ग्रामं गच्छती'त्यादावेव च मुख्यप्रयोगः, 'गम्यत' इत्यादौ च धातोर्व्यापारजन्यफले, आख्यातस्याश्रयत्वे लक्षणा—इत्येव किं न स्याद्विनिगमकाभावात्, तस्माद्-धातोर्व्यापारः द्वितीयायाः कर्माख्यातस्य च फलमर्थ इत्येव ज्यायः । युक्तञ्चै-तत्, 'गम्यत' इत्यादौ फलस्योभयविधया मानानभ्युपगमादित्यभिप्रेत्याह—**अस्तु वे**ति । [fol. 13a ends] द्वितीयादेरात्मनेपदादेश्च फले शक्तेः फलविशेषविधे [? ०षबोधे] धातुविशेषसमभिव्याहारनियामकतायाः लघुतर-प्रकारमाह—**स्ताम्वे**ति ।

विशिष्टस्त्विति । 'गच्छती'त्यादौ जनकतया फलविशिष्टो व्यापारः, 'गम्यत' इत्यादौ च जन्यतया व्यापारविशिष्टं फलमित्यर्थः । एवञ्च द्वितीयायाः आधेयत्वम्, कर्माख्यातस्य चाश्रयत्वम्, कर्मकृतश्चाश्रयोऽर्थः, तादृशफलान्वितस्वार्थाभिधान एव च द्वितीयेनि भावः । **भूमि**मित्यादि । **अनुरोधादि**ति । गमनादिफलस्य भूम्यादिनिष्ठसंयोगादेरात्मनिष्ठत्वेऽपि 'आत्मानं प्रयाती'त्यादिव्यवहारा-[भावा]-दिति भावः । परसमवेतत्वस्य फलान्वयित्वे तद्दोषतादवस्थ्यादुक्तं **क्रियान्वयी**ति । स्वात्मभिन्नत्वका-[? ०न्नका०]-लादिवृत्तित्वात् समवेतत्वानुधावनम् [इति] परमार्थः । समवेतत्वं संसर्ग इति तु ज्यायः, उभयत्र च लक्षणाया एव वक्तव्यत्वात्, तत्र च गौरवस्याकिञ्चित्करत्वेऽपि प्रतीतिविषयताकल्पनागौरवस्य दुर्वारत्वात् ।। १५ ।।

सर्वत्र परत्वे प्रकृत्यर्थस्यान्वये 'आत्मा गम्यत' इत्यादिकमपि स्यात्, गमनादेर्गमनादिभिन्नसमवेतत्वादिति आह—**इयांस्त्वि**ति । **सुपे**ति । तथा च

---

121. यद्यत्परत्वम् A. यद्यत्० seems to be redundant, as it is not quoted as a प्रतीक in the commentary. Not also explained by Mathurānātha or Rāmacandra.

'घटं जानातीच्छति कुरुते चैत्रः', 'मैत्रेण ज्ञायते इष्यते क्रियते घटः' इत्यादौ सविषयकपदार्थाभिधायिधातुयोगे कर्मप्रत्ययेन यथायथं विषयित्वं विषयत्वञ्च, कर्तृ तिङा आश्रयत्वम्,[122] तृतीयया चाधेयत्वं बोध्यते।

'ग्रामं गच्छती'त्यादेर्ग्रामनिष्ठसंयोगजनकग्रामभिन्नसमवेतक्रियेत्यादिकमर्थः। **तिङादि**नेत्यादिपदेन कृतः परिग्रहः। एवञ्च 'ग्रामो गम्यत' इत्यादेर्ग्रामभिन्नसमवेतगमनजन्यफलशाली ग्राम इत्यादिकमर्थः। व्युत्पत्तिवैचित्र्याच्च प्रथमान्तार्थस्याख्यातार्थे तस्य च[123] पुनराख्यातान्तरेऽन्वयः, सर्वत्र भेदे [fol. 13b ends] ग्रामादेरन्वयस्तद्व्यक्तित्वावच्छिन्नप्रतियोगितासंसर्गेण, 'प्रमेयं गच्छती'त्यादिव्यवहारात्।

[124]**नव्यास्तु**—भेदाश्रयश्च पृथगेवार्थः, एवञ्च सुपा प्रकृत्यर्थप्रतियोगिकभेदाश्रयसमवेतत्वसंसर्गः क्रियायां प्रत्याय्यते, तिङादिना च प्रकृत्यर्थाश्रयनिष्ठभेदप्रतियोगिकत्वसंसर्गः कर्मणीति न व्युत्पत्तिपरित्यागः, फले भेदे चैकस्या एव क्रियाया अन्वय इति न विभिन्नगमनमादायातिप्रसङ्गः। वस्तुतो लाघवाद्

---

122. स्वाश्रयत्वम् A. Not quoted as a प्रतीक by any commentator Reading here after Rāmacandra (cf. TCM IV, Voll II, p. 988) and in the light of the commentary.

123. MS adds a redundant तस्य.

124. Here is a marginal note in a different hand :

विहगः पृथिवीं प्रयातीत्यादौ पृथिवीत्वावच्छिन्नप्रतियोगिताकभेदस्य विहगावृत्तित्वादनन्वयापत्तिरपि न, भूखण्डस्यैव पृथिवीपदार्थत्वात्, न तु पृथिवीविहगसाधारणपृथिवीत्वावच्छिन्नस्य, तथा च प्रकृत्यर्थतावच्छेदकावच्छिन्न··· [-प्रतियोगिताकत्व सम्बन्धे-]-नान्वये··· [विहगः पृथिवीं प्रया-] तीत्या-[दा-] वपि तथाऽनन्वय···[प्रसङ्गात्]···[पृथिव्यर्थवाचक-]-सामान्यपदस्यापि विशेषपरस्त्वमिति लक्षणयैवावगतिकतद्वारणसम्भवादिति निरस्तम्, लक्षणाप्रतिसन्धानं विनाऽपि प्रामाणिकैरुररीकृतत्व त्। यद्यपि तन्तुं तन्तुर्गच्छती'त्यादिरेकतन्तुस्थलेऽपि व्यवहारः, तत्रन्तो···[॰न्तोस्तत्तन्तुग-]मने स नोपपद्यते··· [ग-]मने तत्तन्तुसम···[॰मवेत-]त्वस्य बाधात् संयो[॰योग-]स्य द्विष्ठतया स्वस्मिन्···[स्वसंयोगस्य सिद्धा-] वपि अग्राद्यवच्छिन्नक्रियया तदवच्छेदकान्तरे स्वसंयोगसत्त्वे बाधकाभावात्, अन्यथा समवायिकारणस्यैकतन्तुकपटं प्रत्यसम्भवात्, तथापि तन्तुपदस्य तन्त्ववयवे लाक्षणिकत्वादेव तद्व्यवहार इति। एतेन—'रामरावणयोर्युद्धं रामरावणयोरिवे'त्यादौ सादृश्यघटकतद्भिन्नत्वांशस्य [यथा] निवेशनं नास्ति तथेहापीति प्रत्युक्तम्, तयोर्युद्धविशेषेऽपि युद्धान्तरमु [? ॰रस्यो-]पमान[-त्वासम्भवा-] द्दृष्टान्तासिद्धेरिति भावः। (For a similar comment in Mathurānātha, see TCM IV, pp. 982-983).

अन्वयबोधे त्वयं विशेषः यदेकत्र कर्तर्याश्रयत्वम्, तत्र क्रिया, तत्र विषयित्वम्, तत्र कर्मविशेषणम् । अन्यत्र कर्मणि विषयता, तत्र क्रिया, तत्राधेयत्वम्, तत्र च कर्तेति ।। १७ ।।

भेद एवार्थः, तस्य च क्रियायां सामानाधिकरण्यम्, कर्मणि प्रतियोगित्वं **संसर्गः** । तिङादिना च कर्मत्वतद्भेदस्य [?] च कर्मणि वाऽन्य इत्यन्यदेतदिति तु परमार्थः ।। १६ ।।

मुख्यं कर्मत्वादिकमभिधाय भाक्तं तदाह—**घटमिति** । विषयिवाचकधातुयोगे [125]कर्तृविहिताख्यातस्थले द्वितीयाख्यातयोः[126] कर्माख्यातस्थले[127] तृतीयाख्यातयोश्च[128] विभिन्नमेव कर्मत्वादिकमर्थ इति व्युत्पादयति—**घटमि**त्यादिनेत्यपि वदन्ति । **यथायथमि**ति । 'घटं जानाती'त्यादौ विषयित्वम् [अर्थः] न तु विषयत्वम्, 'रूपं न जिघ्रती'त्यनुरोधात् । इह हि रूपविषयित्वस्याभाव आधेयताविशेषसंसर्गेण घ्राणजन्यत्वाद्यवच्छेदेन प्रतीयते, न तु रूपविषयकघ्राणजाश्रयत्वाभावः, विषयताविशेषस्य यदाधेयाधारत्वं तत्संसर्गेणैव घ्राणजन्यत्वादौ विषयित्वान्वयस्य व्युत्पन्नत्वात्, 'रूपं जिघ्रती'त्याद्यप्रयोगात् । "तमेव विदित्वे"[129]त्यादौ तदन्यविषयित्वव्यवच्छेदप्रत्ययादपि द्वितीयाया विषयत्वमर्थः, तथैव समभिव्याहारलाभात् । 'ज्ञायते घट' इत्यादावाख्यातस्य विषयत्वम्, 'चैत्रेण ज्ञायते घट' इत्याद्यनुरोधादिति भावः । **आश्रयत्वमि**ति । न पुनराधेयत्वम्, 'घटो न जानाती'त्याद्यनुरोधादिति भावः[130] । **आधेयत्वमि**ति । न पुनराश्रयत्वम्, 'घटेन न ज्ञायत' इत्याद्यनुरोधात् । अत्र हि ज्ञानत्वाद्यवच्छेदेन घटाधेयत्वस्यैवाभावः प्रतीयते [fol. 14a ends] न तु घटाश्रयत्वस्य, निरूपकत्वादेः सम्बन्धस्य प्रतियोगितानवच्छेदकत्वादिति भावः[131] । 'घटेन नश्यत' इत्यत्र तृतीययाऽनुयोगित्वं बोध्यते, 'गगनेन [न] नश्यत' इत्यनुरोधादित्यपि बोध्यम् ।। १७ ।।

125-126. Following a marginal insertion.

127. ० स्थले following a marginal insertion.

128. After तृतीया , कर्त्रा० has been crossed out in the MS.

129. श्वेताश्वतरोपनिषत्, ३।८, ६।१५

130. Marginal note—विषयिताया वृत्त्यनियामकतया प्रतियोगितानवच्छेदकत्वात्, वृत्त्यनियामकसम्बन्धस्यापि प्रतियोगितावच्छेदकत्वे ज्ञानाश्रयेऽपि 'न जानाती'ति स्यात्, तस्य केवलान्वयित्वात् । 131. Marginal note—तस्य प्रतियोगितावच्छेदकत्वे केवलान्वयितया 'ज्ञायत' इत्यत्रापि 'न ज्ञायत' इति व्यवहारापत्तेरिति ।

'ज्ञातो ज्ञाता नष्ट' इत्यादौ कर्तृकर्मकृतां विषयाश्रयप्रतियोगिबोधकत्वम् । 'यतत' इत्यादौ यत्यादिनोपस्थिते यत्ने विषयित्वेन नान्वयः किन्तूद्देश्यत्वेन, पदस्वाभाव्यात् । अत एवाभुञ्जानेऽपि 'भोजनाय यतत' इत्यादयः प्रयोगाः ।। १८ ।।

विशेषणविधया भाक्तकर्मकत्वाद्यभिधानस्थलमाह—**ज्ञातवि**ति । ज्ञातवित्यादेर्विषयेत्यादिना यथासंख्यमन्वयबोधकत्वं सामानाधिकरण्यानुरोधादिति भावः । ननु सविषयकधातुयोगे यदि द्वितीयाया विषयित्वमर्थस्तदा 'घटं यतत' इत्याद्यपि स्यादित्यत आह—**यतत** इति । कृञादिनोपस्थापिते यत्ने विषयत्वेनैवान्वयो न तूद्देश्यत्वेन, 'भोजनाय करोती'त्यप्रयोगादत उक्तम्—**यत्यादिने**ति । **विषयित्वेने**ति । सहार्थे तृतीया । **उद्देश्ये**ति । एवञ्च उद्देश्यत्वबोधकचतुर्थ्या 'घटाय यतत' इत्यादिरेव प्रयोग इति भावः । तत्र द्वितीयार्थे चतुर्थी[132] द्वितीयाबाधिका, [133]तथा च विषयत्वादिकमेव तदर्थ[134] इति मतं निराकोति—**अत एवे**ति । **अभुञ्जाने** भोजनविषयकयत्नशून्ये । इदन्तु वोध्यम्—यदि कृञो योगे द्वितीयादेर्विषयित्वादिकमर्थस्तदा 'आकाशं करोतीश्वर' इत्यादयः कुतो न प्रयोगः, कर्मपदस्योपादानलक्षणयैव साकाङ्क्षत्वादिति **प्राञ्चः** । विषयित्वादिवज्जनकत्वजन्यत्वजन्या अपि यथायथमर्थाः, न तु जनकादिमात्रम्, नान्तरीयककृतिजन्ये 'तं करोती'त्याद्यव्यवहारात् । 'गच्छती'त्यादौ परसमवेतत्ववत् 'करोती'त्यादावुत्पत्तिरपि वाच्या, सा च कर्मापेक्षिका प्रयोजकत्वसम्बन्धेन कृत्यन्वयिनी कर्मप्रत्ययार्थः । धातोरेव चोत्पत्तिरर्थः, कर्मप्रत्ययस्य च निरूपितत्वमपि, एवं 'घटं करोती'त्यादेर्घटनिरूपितोत्पत्त्यनुकूलघटविषयककृतिमानिति, 'घटः क्रियत' इत्यादौ [fol. 14b ends] 'घटनिरूपितोत्पत्त्यनुकूलकृतिविषयो घट' इत्यर्थः । इदञ्च [? इत्थञ्च] 'आकाशं न करौती'त्यादिरपि सूपपदः, उत्पत्त्यादावाकाशनिरूपितत्वप्रतिषेधात् । वस्तुतो जन्यनिरूपितविषयित्वस्य जन्यनिष्ठविषयत्वस्य च यदाधारत्वं तत्संसर्गेणैव विषयित्वादेरन्वयः, तथैव साकाङ्क्षत्वात्, विषयत्वमप्याधारताविशेषसंसर्गेणैव कृदर्थतावच्छेदकमिति तु **नव्याः** । द्विविधं कृतिविषयित्वादि, फलविधयोपादानविधया च, तत्र प्रथममेव कृञो योगे कर्मप्रत्ययार्थ इत्यपि वदन्ति । यत्नाद्यर्थकयोगे विशेष्यत्वादिकमेवार्थः, नान्तरीयककृतिविषये विशेषणविधयाऽपि 'तं करोती'त्याद्यव्यवहारात्, दुःखासम्भिन्नत्वादिना सुखेच्छादशायां 'दुःखमिच्छती'त्यव्यवहाराच्चेति दिक् ।।१८।।

---

132. Marginal note—'पुष्पेभ्यः स्पृहयती'त्यादिस्थले यथा तथेहापि ।

133-134. Following a marginal insertion.

धातोरर्थः फलम्, अनुकूलव्यापारो व्यापारमात्रं वाऽऽख्यातस्य, जन्यजनकभावः संसर्गमर्यादया लभ्यः। लडादिलिङाद्यर्थौ[135] वर्तमानत्वादीष्टसाधनत्वादिकमेकपदोपात्तत्व[136]-प्रत्यासत्त्या तत्रैवान्वेति, भावप्रत्ययस्य घञादेरनुकूलव्यापार एवार्थः।

मण्डनमतं परिष्कृत्याह—**धातो**रिति। गम्यादेः संयोगत्वादिना फलमर्थः, तथेव प्रतीतेः, अतएव वक्ष्यति—**तण्डुलवृत्तिफलविशेषे**ति। **व्यापारमात्र**मिति। नन्वेवं फलानुत्पाददशायां व्यापारसत्त्वेन [?०सत्त्वेऽपि] 'पक्ष्यती'ति स्यात्, न तु 'पचती'ति ; न स्याच्च फलसत्त्वेऽपि 'पपाचे'ति, फलानुत्पादेऽपि व्यापारतः [पुण्यजननतात्पर्येण][137] 'काशीं गच्छेदि'त्यादिप्रयोगो[138] वा।[139] 'जानाति' 'जानीयादि'त्यादौ धात्वर्थ एव वर्तमानत्वाद्यन्वयस्य क्लृप्तत्वादित्यत आह **लडादेरि**[?०**डादी**]ति। यथासंख्येनान्वयः। **इष्टसाधनात्वादी**त्यादिपदात् कृतिसाध्यत्वबलवदनिष्टाजनकत्वपरिग्रहः। **तत्रै**वेति। आख्यातार्थव्यापार इत्यर्थः। भावप्रत्ययस्य च घञादेर्निरर्थकत्वे वक्ष्यमाणदोष इत्यत आह—**भा**वेति। **अनुकूलव्यापारो** व्यापारमात्रं वा। ननु व्यापारप्रागभावाधिकरणवर्तमानकालान्तरोत्पत्तिकमेव भविष्यत्त्वमत आह [fol. 15a ends]—**न वे**ति। ननु वर्तमानव्यापाराधिकरणस्थूलकालवृत्तित्वमिह वर्तमानत्वमत आह—**नापी**ति। **मिथ**विति। गम्धात्वर्थस्य संयोगात्मकफलस्य द्विष्ठत्वादिति भावः। नन्वेवं ग्रामादेर्गम्यादिकर्मत्वं न स्यात्, धात्वर्थजन्यफलशालित्वस्य धात्वर्थतावच्छेदकफलशालित्वस्य वा तत्रासम्भबादित्यत आह—**प्रत्यये**ति। ग्रामभिन्ने ग्रामाद्यवयवे समवेतो यो ग्रामा-[द्यवयवसंयोगा-]दिरूपो व्यापारस्तज्जन्यसंयोगादिरूपफलशालिनश्चेत्रस्य वारणाय प्रत्ययोपनीतत्वं व्यापार-

---

135. लडादित्तिङाद्यर्थौ A. Reading emended in the light of यथासंख्येनान्वयः in the commentary, and लिङर्थं इष्टसाधनत्वम् in Rāmacandra's commentary (cf. TCM IV, Vol, II, p. 991).

136. ० पदोत्तरप्रत्या० A, which does not figure as a प्रतीक in any commentary. Reading emended in the light of एकपदेति। एकेनाख्यातपदेन व्यापारवर्तमानात्वाद्योर्बोधनादिति भावः in Rāmacandra's commentary (Idem). 137. Inserted in the light of scriptural passages like अहं काशीं गमिष्यामि तत्रैव निवसाम्यहम्। इति ब्रुवाणः सततं काशीवासफलं लभेत्॥ 138. Marginal note in a different hand—न स्याद्विधिबोधितं। 139. Marginal note in a different hand—युक्तावलत्वात्, which makes no sense.

तेन व्यापारसत्त्वे फलानुत्पाददशायां 'पाको भविष्यती'ति न प्रयोगः, न वा व्यापारविगमे 'पाको विद्यत' इति । नापि 'घटभूतलयोर्मिथः संयोग' इतिवत् मिथोगमनमित्यादि, प्रत्ययोपनीतपरसमवेतव्यापार-जन्यधात्वर्थफलशालित्वञ्चकर्मत्वम्, फलनिष्ठाधेयत्वं द्वितीयादिना, व्यापारनिष्ठञ्च तृतीयादिनाऽभिधीयते । एवञ्च 'तण्डुलं पचति चैत्रः' इत्यस्य तण्डुलवृत्तिफलविशेषजनकव्यापारवांश्चैत्रः, 'मैत्रेण पच्यते तण्डुलः' इत्यस्य मैत्रनिष्ठव्यापारजन्यफलविशेषशाली तण्डुल इत्यर्थः । फलव्यापारयोर्विशेषणविशेष्यभावभेदादेव कर्मकर्तृप्रत्यय-व्यवहारः ।

विशेषणम् । गग[? गम-]नादिरेव प्रत्ययोपनीतो न तु ग्रामा [-वयवसंयोगा-] दिरिति भावः । प्रत्ययोपनीतगमनजन्यधात्वर्थसंयोगात्मकफलशालिनि तत्रैव पुनरतिव्याप्तेः[140] वारणाय **परसमवेते**ति । गमनात्मकश्च व्यापारो न चैत्रान्यसमवेत इति भावः । 'चैत्रो गन्ता' इत्यादौ प्रत्ययोपनीतव्यापाराश्रय-श्चैत्रोऽपि चैत्रभिन्ने चैत्रावयवे समवेतस्तज्जन्यसंयोगशालिनि तत्रैव पुनरति-व्याप्तेर्वारणाय **व्यापारे**ति । तथा त व्यापारत्वेन प्रत्ययोपनीतेत्यर्थः । प्राति-स्विकरूपेण व्यापाराभिधाने तु प्रत्ययोपनीतव्यापारेत्यनेन तद्रूपवानेवोपादेयः, तादृशव्यापारजन्यसाक्षात्कारशालिनः आत्मनः पूर्वदेशादेर्ग[? पूर्ववदेव ग]म्यादेः कर्मत्ववारणाय **धात्वर्थे**ति । तद्धात्वर्थेत्यर्थः । **फले**ति स्वरूपकथनम् । फला-देर्धात्वादिलभ्यत्वा[दा]धेयत्वं द्वितीयादेरर्थमाह—**फले**ति । आदिभ्यां कृद्योगे षष्ठीपरिग्रहः[141] । ननु व्यापारे फलस्यान्वयः, फले व्यापारस्य वा, आद्ये 'तण्डुलः पच्यत' इत्यादौ तण्डुलादेः फलवत्ता न प्रतीयेत, द्वितीये 'चैत्रः पचती'-त्यादौ चैत्रादेर्व्यापारवत्ता-[fol. 15b ends]-प्रत्ययानुपपत्तिरित्यत आह— **एवञ्चे**ति । तथा च कर्तृप्रत्ययस्थले व्यापारे फलस्य, कर्मप्रत्ययस्थले च फले व्यापारस्यान्वय इति भावः । **फलविशेषो** विक्लृत्तिः । **व्यापारः** कृतिः, न तु क्रिया, तस्याश्चैत्रावृत्तित्वात्, परम्परया जनकत्वादेश्च घटकतया क्रिया-लाभः । 'गच्छती'त्यादौ च क्रियैव व्यापार इति ध्येयम् । ननु यद्युभयत्रैव व्यापारोऽर्थः तदा कर्तृ[कर्म]प्रत्ययत्वव्यवहारभेदः कुत इत्यत आह— **फलव्यापारयो**रिति । तथा च फलविशेषणकस्वार्थव्यापारबोधजनकप्रत्ययत्वं

140. Marginal note : चैत्रे तु अतिप्रसङ्गवारणाय.

141. Cf. Pāṇini 2. 3. 65

142. ०विशेषे in MS has besn corrected to ०विशेषो in the margin.

वस्तुतस्त्वाख्यातस्येव तृतीयाया अपि व्यापार एवार्थः, कर्माख्यातस्य **च धात्वर्थ**फलनिरूपितत्वमधिकरणत्वम्, कर्मकृत आश्रयः, कर्तृकृतश्च व्यापाराश्रयः, कर्मकर्तृसामानाधिकरण्यानुरोधात् । 'जानाती'त्यादि-प्रयोगे तु पूर्वोक्तैव रीतिरनुसर्तव्या । 'चैत्रेण पच्यते पक्व' इत्यादौ सुवर्थ एव व्यापारे वर्तमानत्वाद्यन्वयः, 'पचमानः पक्ववान्' इत्यादौ पुनरनायत्या पदार्थतावच्छेदक एव व्यापारे तदन्वयः । स्तां वा व्यापाराश्रयौ शक्यौ, विशिष्टमन्वयबललभ्यम्, एवकारस्येवान्ययोग-व्यवच्छेदादौ अन्ययोगप्रतियोगिकव्यवच्छेदस्यातिप्रसक्तत्वात्, अन्य-योगत्वावच्छिन्नप्रतियोगिकव्यवच्छेदस्य शक्यत्वे शक्याप्रसिद्धिः, बाधि-तत्वञ्च, 'पार्थ एवे'त्यादौ पार्थान्ययोगत्वावच्छिन्नव्यवच्छेदस्याप्रत्यय-प्रसङ्गः[143], तस्य ततोऽन्यत्वात् ।

कर्तृप्रत्ययत्वम्, स्वार्थव्यापारविशेषणकफलविशेष्यकबोधजनकप्रत्ययञ्च कर्म-प्रत्ययत्वमिति भावः ।

संख्याद्यतिरिक्तप्रत्ययार्थस्य धात्वर्थविशेष्यकत्व[?० शेष्यत्व]मेवेति व्युत्पत्त्यनु-रोधादाह—**वस्तुतस्त्वि**ति । नामार्थयोर्धा[?०र्थधा]त्वर्थयोर्भेदेन साक्षादनन्वया-दुभयसाधारणमाह—**कर्माख्याते**ति । **आश्रय** इति । व्यापारस्य द्विती[?तृती-]-यादित[144] एव [145]लाभादिति भावः[146] । 'जानाती'त्यादौ फलव्यापा-रयोरप्रतीतेराह—**जानाती**त्यादि । **पूर्वोक्ते**ति । तत्र धातोर्भोजना[?०तोर्ज्ञाना]-दिकं प्रत्ययस्य यथायथमाश्रयत्वविषयत्वादिकमर्थ इति भावः । ननु 'मैत्रेण पच्यत' इत्यादौ यदि द्विती[?तृती]याया एव व्यापारोऽर्थो न धात्वाख्यातयोस्तदा व्यापारे वर्तमानत्वान्वयो न स्यात्; 'जानाती'त्यादौ धातौ, 'पचती'त्यादौ स्वार्थ एव वर्तमानत्वाद्यनुभावकत्वस्य लड़ादेर्व्युत्पन्नत्वादत आह—**चैत्रेणे**ति । तथा च फलवलादेवमपि क्वचिद् व्युत्पत्तिरिति भावः । पूर्वकल्पेऽपि 'चैत्रेण पक्व' इत्यनुरोधादिदं स्वीकार्यम्, तत्र तृतीयाया एव व्यापारः कृतश्चाश्रयोऽर्थः, न तु कृत एव व्यापाराश्रयोऽन[?०श्रयावन]-न्वयप्रसङ्गादिति बोधनाय पक्व इत्युक्तम् । ननु यदि [fol. 16a ends] कर्म [?कर्तृ]कृतो व्यापाराश्रयोऽर्थ-स्तर्हि 'पचमान' इत्यादावेकदेशे व्यापारे कथं वर्तमानत्वाद्यन्वय इत्यत[147] आह—

---

143. ० स्याप्रतीतिप्रसङ्गः A. Reading emended in the light of the commentary. 144. Reading emended in the light of the मूल. 145-146. Indistinct. 147. Between त्य and त, two letters न्वय have been crossed out in MS.

स्वान्ययोगव्यवच्छेदेन शक्यत्वे च स्वत्वस्याननुगमाच्छक्त्यानन्त्यम्, 'नीलो घटो नास्ती'त्यादौ नीलघटत्वावच्छिन्नस्येव 'पार्थ एवे'त्यादावपि पार्थान्ययोगत्वावच्छिन्नस्याभावप्रतीतिः,[148] समानञ्चेदं कृतौ कालान्वयवादिनाम् । धात्वर्थानुकूलव्यापारविरहिण्यपि महीरुहादौ 'संयुज्यत'इत्यादिव्यवहारात् संयोग[149]-मात्रप्रतीतेः न[150] तत्र प्रत्ययवाचितेति [न] सकर्मकत्वम्, 'संयोग'इत्यादौ धात्वर्थमात्र-

पचमान इति । एकदेशान्वयासहिष्णुतायामाह—**स्तान्वे**ति । यदि च तृतीयार्थे वर्तमानत्वान्वयासहिष्णुताऽपि तदा कर्म[?कर्तृ]कृतोऽपीमावर्थविसेयो [?०सेयौ] । नन्वेकपदार्थयोः [?] परम्परमनन्वयात् कथमेवमत आह—**एवकारस्य वे**ति । तथा च तत्रेवात्रापि एकपदार्थयोरन्वयो[?]नानुपन्न इति भावः । ननु तत्रान्ययोग-व्यवच्छेदो विशिष्ट एवार्थो न त्वन्ययोगव्यवच्छेदावित्यत आह—**अन्ययोगे**ति । **अतिप्रसङ्गादि**ति । 'पृथिव्यामेव द्रव्यत्वमि'त्यादेरपि प्रसङ्गात्, सत्तानिष्ठपृथि-व्यन्यवृत्तित्वस्य द्रव्यत्वे व्यवच्छेदादिति भावः । **शक्याप्रसिद्धि**रिति । अन्यत्वस्य केवलान्वयित्वेन 'पार्थ एव धनुर्द्धर' इत्यादावन्यतादात्म्यस्यापि केवलान्वयित्वात् 'पृथिव्यामेव गन्ध' इत्यादावन्यसमवेतत्वादेः समवेतत्वापेक्षया गुरोः प्रतियोगिता-[न]वच्छेदकत्वादि[? ०त्वाच्चे]ति भावः । गुरोः प्रतियोगितावच्छेदकत्वे 'पृथिव्यामेव गन्ध' इत्यादौ नाप्रसिद्धिः, अन्यासमवेतत्वादेरसमवेता-[काशादा]-वेव सत्त्वादत आह—**वाधितत्वाच्चे**ति । पृथिव्या अपि जलादितोऽन्यत्वादिति-भावः । दोषान्तरमाह—**पार्थ एवे**ति । **तस्ये**ति । विशेषाभावस्य सामान्या-भावभिन्नत्वादिति भाव इति **यथाश्रुतार्थबोधिनः** । ननु व्यवच्छेदप्रतियोगिता-कत्वमन्योऽन्याभावपर्यन्त एव पर्याप्तम्, अन्योऽन्याभावत्वन्तु प्रतियोगिताव-च्छेदककोटिप्रविष्टानामन्योऽन्याभावानामनुगमकतया शक्यतावच्छेदकमिति ना-प्रसिद्ध्यादि, अन्योऽन्याभावे च पार्थादेरन्वयान्नातिप्रसङ्गोऽपीत्यत आह—**पार्थे**ति । पार्थादिर्व्यवच्छेदप्रतियोगितावच्छेदकत्वावगाहि-[fol. 16b ends]-प्रत्ययस्याभावप्रसङ्ग इत्यर्थः । **तस्ये**ति । उक्तप्रत्ययस्य । **ततः** वस्तुतो यः पार्थादेरन्योऽन्याभावस्तद्योगत्वावच्छिन्नप्रत्ययस्ततः । **तस्य** पार्थान्ययोगत्वावच्छिन्न-प्रतियोगिताकव्यवच्छेदस्य, **ततो** वस्तुतो यः पार्थान्योऽन्याभावस्तन्न[? ०स्तद्वदनु]-योगित्वावच्छिन्नव्यवच्छेद इति [? ०च्छेदादिति] तु न युक्तम्, समनियतयो-

148. ०योगव्यवच्छिन्न० A. Reading here in the light of the Commentary.

149. संयोगत्वमात्र० A. 150. न तु तत्र A.

प्रतीतेर्घञादेः प्रयोगसाधुत्वमात्रमिति मण्डनमतानुयायिनः । तन्न, 'पचती'त्यादौ पाकानुकूलवर्तमानयत्नाननुभवप्रसङ्गात्, फलानुकूलादृष्टवत्यपि 'पचती'त्यादेर्विभागाद्यनुकूलपूर्वसंयोगादिमति निश्चलादावपि विहगे 'त्यजतो'त्यादेः प्रयोगस्य प्रसङ्गाच्च ।। १९ ।।

स्तयोरेकत्वात् । यद् वा—नन्वन्यवृत्तित्वावच्छिन्नप्रतियोगिताकव्यवच्छेदोऽर्थः, तस्य च स्ववृत्तिधर्मवत्समभिव्याहृतपार्थाद्यनुयोगित्वावच्छिन्नप्रतियोगिताकव्यवच्छेदसंसर्गेण धनुर्द्धरादावन्वयान्नोक्तदोष इत्यत आह—**पार्थे**ति । **व्यवच्छेदस्ये**ति । व्यवच्छेदस्य प्रत्ययो[151] व्यवच्छेदप्रकारकप्रत्ययः । **तस्ये**ति । उक्तसामान्याभावस्य उक्तविशेषाभाववतः···†शक्त्यानन्त्यमिति । पार्थाद्यन्ययोगव्यवच्छेदकत्वा[? ०दत्वा]दीनां शक्यतावच्छेदकानामानन्त्यादिति भावः । ननु तवाप्यन्ययोग[-स्य] व्यवच्छेदोयावन्वये [? ०च्छेदेऽन्ययोगत्वावच्छिन्न]प्रतियोगितामात्रं न संसर्गः उक्तदोषादत आह—**नीलो घटो नास्ती**ति । तथा च यथा तत्र घटे नीलस्यान्वयेन विशिष्टस्यैवाभावेऽन्वयः, विशिष्टत्वावच्छिन्नप्रतियोगितैव संसर्गः तथा ह्यन्य[? अन्य]-स्मिन् पार्थादेरन्वयादपीति भावः । नन्वेकपदार्थयोः परस्परानन्वयादिव्युत् [? ०न्वयव्युत्]पत्तेरेव तत्र शक्त्यानन्त्यमास्थीयत इत्यत आह—**समानञ्चे**ति । इदमेकपदार्थयोः परस्परान्वयित्वम् । 'पचती'त्यादेरेकपदार्थयोः कृतिवर्तमानत्वयोरन्वयस्य त्वयाऽप्युपगमात् स्थलविशेषे तथाऽन्वयो नानुपपन्न इति भावः । ननु यत्र श्येनकर्मणा महीरुहादौ संयोगोत्पन्नस्तत्र प्रत्यायन[? ०त्ययेन] कर्मात्मकव्यापाराभिधानात् महीरुहादेः संयोगादिकर्मत्वेन संयुक्तिप्रकृतेरपि सकर्मकत्वं स्यादित्यत आह—**धात्वर्थे**ति । ननु 'महीरुहः संयुज्यत' इत्यत्र बाधेन व्यापारा[न]भिधानेऽपि 'श्येनसंयुक्त' इत्यत्र [fol. 17a ends] व्यापाराभिधानन्तु[?०धानं] बाधविरहादित्यत आह—**संयोगे**ति । **न तत्रे**ति । तथा च तत्र **नैयायिकानामि**वास्माकमपि यथायथमाश्रयत्व एव [? ०श्रयत्वमेव] प्रत्ययार्थ इति भावः । ननु तथापि घञादिना व्यापाराभिधानात् 'संयोग' इत्यादौ धातोः सकर्मकत्वं स्यादित्यत आह—**संयोगे**ति । यावदुक्तस्य **मण्डनेना**नभिधानान्**मतानुयायिन** इत्युक्तम् । **पाकानुकूले**ति । पाको विक्लृत्त्यनुकूलः कर्मविशेषः, तत्प्रकारकयत्नत्वविशिष्टाननुभवप्रसङ्गादित्यर्थः । उक्तरीत्या क्रियायाः संसर्गविधयैव भानात् । यत्नस्याभानादिति

---

151. MS repeats व्यवच्छेदस्य प्रत्ययो—a case of dittography.

† Faint

तत्र तत्र तत्तत्फलानुकूलतत्तद्व्यापारविशेष एव धात्वर्थः, सर्वत्र धात्वर्थाश्रयमेव कर्तृत्वम्, संख्यावर्तमानत्वादिकं क्वचिदाश्रयत्वादिकमपि वा आख्यातार्थ इति गुरुमतमपि तत्र तत्र तादृशयत्नाननुभवप्रसङ्गादनादेयम् ।। २० ।।

।। इति महामहोपाध्यायश्रीरघुनाथशिरोमणिभट्टाचार्यकृत आख्यातवादः समाप्तः ।।०।।

भावः, एतेन व्यापारत्वं यत्नत्वमेवेति परास्तम् [?] । ननु तत्राख्यातस्य क्रियाविशेषानुकूलयत्नलक्षणयैव तथाऽनुभवो भविष्यतीत्यत आह—**विभागेति** । …[व्यापारघटितं या]दृशमनुकूलत्वं तस्यैव संसर्गविधया भाने तु नायं दोष इत्यवधेयम् । न च तत्र तत्क्रियानुकूलयत्न एव वाख्या [? आख्या]-तार्थोऽस्तु, अनुकूलव्यापारपदेनापि तस्यैवाभिधानादिति वाच्यम्,…[यत्नस्या]पि शक्यत्वे गौरवापत्तेः, घञादेः क्रियाविशेषादौ शक्तेरपि त्वया वक्तव्यत्वेनातीव गौरवाच्च । एतेन तवापि फलानुकूलत्वस्य शक्यत्वान्न गौरवम्, तत्तत्-क्रियाविशेषाः[?०शेषः] कृतिः पृथगेव वाख्यातार्थाविशिष्ट-[? ०तार्थौ, विशिष्ट]-मन्वयबललभ्यमित्यपि निरस्तमिति दिक् ।। १९ ।।

गुरुमतमाह—तत्र तत्रेति । गम्यादेः संयोगानुकूलस्पन्दः, पचेः परम्परया विक्लृत्त्यनुकूला चेष्टैवार्थ इति भावः । पचेस्तथाविधा कृतिरेवार्थः, तादृशयत्नाननुभवप्रसङ्गा [fol. 17b ends] दित्यस्य च फलानुकूलव्यापारजनकयत्नानुभवेत्यादिकमर्थ इत्यपि **कश्चित्** । तन्न, 'पाक' इत्यादौ यत्नाप्रतीतेः, साक्षाद्विक्लृत्त्यनुकूलस्पन्द एव पचेरर्थः । **धात्वर्थाश्रयत्वम्**इत्युत्तरग्रन्थस्य च फलादिभिन्नधात्वर्थसम्बन्धित्वमर्थः, **क्वचिदाश्रयत्वम्**इत्यत्रापि आश्रयत्वं सम्बन्धित्वमेव, पाकस्य च चैत्रादौ कृतिरेव सम्बन्ध इत्यपि वदन्ति । **क्वचिद्** भावप्रत्ययातिरिक्तस्थले (?) । **यत्नेति** । न च लक्षणया तथानुभवस्तथापि लाघवाद् यत्नत्वेनैव शक्तेरिति संक्षेपः ।। २० ।।

।। इति महामहोपाध्यायश्रीसार्वभौमभट्टाचार्यविरचिताख्यातवादव्याख्या सम्पूर्णा।। ० ।।[152]

152. ।। शुभमस्तु ।। [शकाब्दाः] १५४० ।। ९ माघ ।। ० ।।—Post-colophon in MS.

नामसूची

कश्चित् २१, ३५
केचित् १
गुरुमतम् ४, ३५
(जानकीनाथ) चूड़ामणिः १
नव्याः २, ४, १६, २५, २७, २९
नैयायिकाः ७, ३४
नैयायिकनयः ५
परे ४
प्राञ्चः २, १५, १६, १७, १९
प्राचीनमतम् ३
सम्प्रदायः २५
मण्डन (मिश्रः) ३४
मण्डनमतम् ३०
मण्डनमतानुयायिनः ३४
रामभद्र (सार्वभौमः) १
वैयाकरणमतम् ९
वैयाकरणाः ११
यथाश्रुतार्थबोधिनः ३३
रघुनाथशिरोमणिभट्टाचार्यः ३५
(रामभद्र) सार्वभौमभट्टाचार्यः ३५

शुद्धिपत्रम्

पृ०	पं०	अशुद्धम्	शुद्धम्
१	७	कृत्तिनां	कृतिनां
१	२६	after commentary	after the commentary
२	२७	of commentary	of the commentary
२	३२	of commentary	of the commentary
३	१२	०निरूलक्षण०	०निरूढ़लक्षण०
३	१२	नानुकूव्यापार	नानुकूलव्यापार
३	१८	रथस्यजती-	रथस्त्यजती-
३	२६	by commentary	by the commentary
७	३१	प्रतीतिरेति	प्रतीतेरिति
८	२२	० प्रयोगवदत्येन	प्रयोगवदन्येन
८	२६	अभिनाभाव०	अविनाभाव०
१७	१४	०स्थपित	०स्थापित
१७	२७	०स्थप्याया	०स्थाप्याया
१९	३	धातुत्वाविघटितत्वात्	धातुत्वादिघटितत्वात्
२६	२	०पेक्षिफं	०पेक्षिकं
३१	२९	चैत्रेत्ति०	चैत्रेऽति०